CC-0.In Public Domain. Digitization by eGangotri

चण्डीभक्तिविनोदिनी

सप्तशती चण्डी



महामात्य (चौतारा)

नवमीसिंह भण्डेल

(राजभण्डारी)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

श्री माहम्माया जगदम्बा दुर्गा भवानी भगवती

भवानी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चण्डीभक्तिविनोदिनी

सप्तशती चण्डी

महामात्य (चौतारा)
नवमीसिंह भण्डेल
(राजभण्डारी)

रचनाकाल

ने० सं० ८१६ — ८२०
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal
वि० सं० १७५३ — १७५७

CC-0.In Public Domain. Digitization by eGangotri

प्रकाशक :

केशरबहादुर राजभण्डारी

ठँहिटी टोल

काठमाडौं

नेपाल ।

प्रथम संस्करण १००० प्रति

मूल्य : रु. २०/-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मुद्रक : सकटा प्रेस, ख १-८३ टेवहाल, काठमाडौं-३

CC-0.In Public Domain. Digitization by eGangotri

मन्तव्य

नेपाल सम्वत् ८१७ तदनुसार शाके सम्वत् १६१६ वि. सं. १७५४ ई. सं. १६६७ मा नेपालका राजा भूपालेन्द्रमल्लका महामात्य (प्रधान-मन्त्री, प्रधान काजी) नवमीसिंहज्यू बारे प्रा. विश्वनाथ भट्टराइज्यूले लेख्नु भएको नेपालका विद्वान् (२) "चौतारा नवमीसिंह" भन्ने लेख "रत्नश्री" पत्रिका वर्ष १३ अङ्क २ मा प्रकाशित भएको रहेछ।

उक्त लेखमा नवमीसिंहकृत "तन्त्रचिन्तामणि १, कुलमुक्ति-कल्लोलिनी २, पुष्परत्नाकर' ३, चण्डीभक्तिविनोदिनी ४ वटा पुस्तक-को व्याख्या गर्नु भएको थियो। यी चारै पुस्तक नेपाल राष्ट्रिय अभिलेखालयमा पञ्जीकरण भई सुरक्षित रहेको रहेछ भन्ने बुझिन आयो।

उहाँका कृतिहरूमा तन्त्रचिन्तामणि संस्कृत श्लोकबद्ध रूपमा लेखिएको अत्यन्त ठूलो ग्रन्थ रहेछ भन्ने र अरू कृतिहरू पनि संस्कृतमा श्लोकबद्ध छ भन्ने उहाँको लेखबाट यथार्थ रूपमा थाहा पाइन्छ। यतिबाटै श्री नवमीसिंहज्यू तन्त्रशास्त्रका पनि विद्वान् हुनुहुन्छ भन्ने तथ्य प्रमाणित हुन आउँछ।

प्रा. विश्वनाथज्युको उक्त लेखमा "चण्डीभक्तिविनोदिनी" प्रथम पत्रमा लेखिएको निम्न श्लोक उद्धृत गरिएको छ :

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ख्याता सप्तशती समस्त भुवने संख्या न पूर्णा क्वचित् ॥
सम्यक् संशयशालिना ननु मया ग्रन्थैः कृतो निर्णयः ॥
ज्ञाता सप्तशती प्रमाणमधुना श्लोकाः पुनर्ल्लेखिता– ॥
स्तत्मात् सप्तशतीतिपाठ विषय नासंगतिः कान्चन ॥

"रत्नश्री"

अघि पिताज्यू श्री साहु कीर्तिबहादुर राजभण्डारीले बराबर भन्नु हुन्थ्यो "हाम्रा पूर्खामा काजी नवमीसिंह अत्यन्त विद्वान् हुनुहुन्थ्यो। उहाँले "नवमीसिंह चण्डी" बनाउनु भएको थियो । एक प्रति काशी विश्वनाथमा पठाउनु भएको थियो भनी भन्थे । एक प्रति हामीकहाँ पनि हुनु पर्छ भनी भन्नुहुन्थ्यो । तर यस विषयमा कुनै चाख लिइएको थिएन ।

प्रा. विश्वनाथज्यूको लेखले उक्त चण्डी हेर्न कुतकुत्याउन थाल्यो। खोजी गर्दा एक प्रति सुरक्षित स्थानमा फेला पारें । पुस्तकको साइज ११" ६ इञ्च लामो ४" इञ्च चौडाइ भएको, हरिताल लगाएको नेपाली कागजमा पत्रको एकातिर ७ हरफ र अर्कोतिर ७ हरफ गरी १४ हरफको पुरानो नेवारी अक्षरको लिपिमा लेखेको ७२ पत्र भएको सार्थ काठको गाता राखेको रहेछ ।

यो चण्डी भेटाएपछि नेवारी अक्षरबाट मैले जानेसम्म जस्ताको तस्तै देवनागरीमा प्रतिलिपि उतारें । काठमाडौं नरदेवी टोल बस्ने विद्वान् श्री विद्यानाथ भट्टज्यूसंग पनि देवनागरी लिपिमा उही चण्डी एउटा प्रतिलिपि रहेछ । पुस्तक भिडाई हेर्दा अरू सबै मिल्यो । तर मैले उतारेको प्रतिलिपि पुस्तकमा नभएको "प्राधानिक रहस्य, वैकृतिक रहस्य र मूर्ति रहस्य" हरू उहाँसंग रहेको पुस्तकमा रहेछ ।

श्री नवमीसिंहका कृति चारै पुस्तक कलकत्ता म्यूजियममा पनि रहेको रहेछ । यो कुरा श्री विद्यानाथज्यूले उहाँ कहाँ रहेको पुरानो पुस्तकहरूको सूचि भएको एउटा ठूलो सूचिको पुस्तकमा लेखिएको देखाइदिनु भएको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

थियो । श्री नवमीसिंहज्यूका कृतिहरू अद्यापि छापी प्रकाशमा आएको छैनन् ।

तन्त्रोक्त प्रमाणहरूद्वारा निर्णय गरी तन्त्रोक्त प्रमाण अनुसार ७०० श्लोक पूरा गरी गौरव साथ लेखिएको देवीभक्तहरूको निमित्त महत्वपूर्ण यो सप्तशती चण्डी प्रकाशमा नल्याई राखी छाड्नु उचित नसमझी श्री विद्यानाथज्यूसंग भएको पुस्तकको प्रतिबाट तीनै रहस्यहरू समेत यस पुस्तकमा समावेष्ट गरी "चण्डिका सप्तशती" नामको यो चण्डीभक्ति-विनोदिनी सप्तशती चण्डी विद्वान्हरू समक्ष प्रस्तुत गरेको छु ।

यस पुस्तकको छपाइमा धेरै अशुद्धिहरू हुन सक्छ । सकेसम्मको शुद्धिपत्र बनाई राखिएको छ । यसमा पनि छुट्न गएका अशुद्धिहरूलाई शुद्धचाई पढ्नु हुनेछ भन्ने आशा गर्दछु । साथै परमेश्वरीको अनुकम्पाले अर्को संस्करण छपाउने मौका पाएमा जहांसम्म सकिन्छ शुद्धिपत्र राख्नु नपर्ने गरी छपाई विद्वान्हरू समक्ष राखिदिनेछु । यो कृति श्री नवमी-सिंहज्यूको हो । यसको सबै श्रेय उहाँमै छ ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।।
यदि शुद्धमशुद्धं वा शोधनीयं महद्बुधैः ।।

प्रकाशक

केशरबहादुर राजभण्डारी

ठँहिटी टोल

मिति : २०४३।६।२६।१ मा काठमाडौं ।

विजया दशमी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विषय-सूची

विषय	पेज नं.	विषय	पेज नं.
ग्रन्थ कृत	१	पीठादिपूजा	१८
ग्रन्थकार परिचय	२	पाठ नियम	२३
चण्डी प्रकाश	२	पाठक्रम	२५
सप्तशतीश्लोक व्यवस्था	३	अर्गला	२६
सप्तशती व्याख्या	५	कीलक	२९
मन्त्रोद्धार	६	कवच	३१
मन्त्रजपफल	८	सप्तचण्डी प्रथमोऽध्याय	४१
दीक्षामहत्व	८	द्वितीयोऽध्याय	५३
चण्डिका पूजन	९	तृतीयोऽध्याय	६१
यन्त्रोद्धार	१०	चतुर्थोऽध्याय	६८
पद्मासन	११	पञ्चमोऽध्याय	७७
षडचक्र भेद	११	षष्ठमोऽध्याय	९६
भूतशुद्धि	११	सप्तमोऽध्याय	१००
यन्त्रोद्धार	१२	अष्टमोऽध्याय	१०४
एकादशन्यासादि	१२	नवमोऽध्याय	११३
ध्यान	१७	दशमोऽध्याय	११९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विषय	पेज नं.	विषय	पेज नं.
एकादशमोऽध्याय	१२४	नवचण्डीविधान	१७०
द्वादशोऽध्याय	१३५	शतचण्डीविधान	१७७
त्रयोदशोऽध्याय	१४१	कालाविच्यवस्था	१७६
बाधानिकरहस्य	१४५	मण्डप निर्माण	१७६
वैकृतिकरहस्य	१५०	विधि	१८०
मूर्तिरहस्य	१५६	कामानानुसारन्यासद्रव्य	१८२
पाठविधान	१६०	सहस्रचण्डी विधान	१८४
पुरश्चरण	१६४	होमविधि	१८७
आवृतिफलम्	१६६	कुमारी पूजा	१८७
दक्षिणा व्यवस्था	१६८	दीपदानविधि	१६०
काम्यानि	१६८	सप्तशती धारण	१६२
अष्टचण्डी विधान	१७०		

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शुद्धिपत्र

पेज	हरफ	भएको	हुनुपर्ने
१०	१	तर्यणादि	तर्पणादि
२३	२	देवां	देवि
२४	१८	भाषिते	भाषितम्
२५	२	सत्तशत्या	सप्तशत्या
३३	१६	श्रोतयोर्द्धा	श्रोत्रयोर्द्धा
३४	८	धारिण्युभवं	धारिण्युभवौ
३६	१५	भवेतस्य	भवेत्तस्य
३६	१५	त्रैसोक्ये	त्रैलोक्ये
३८	४	चिसन्ध्य	त्रिसन्ध्य
३८	४	धस्तु	द्यस्तु
४३	४	सद्वृतर्धमंतः	सद्वृत्तैधमंतः
४४	६	सस्थित	संस्थिति
४५	४	चितं	चित्तं
४५	१७	निकृतं	निकृतः
४५	१८	हार्वि	हर्दी
४७	१३	त्वतो	त्वत्तो
५४	६	अन्येपां	अन्येषां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पेज	हरफ	भएको	हुनुपर्ने
५४	१३	वदनाततः	वदनात्ततः
५५	६	प्रजापतेन	प्राजापतेन
५७	१८	···सहस्त्रेण	···सहस्त्रेण
५८	६	सहश्रेण	सहस्त्रेण
५८	६	···सहस्त्रौघैरनेकै	···सहस्त्रौघैरनेकैः
५६	५	शक्ति	शक्ती
६०	७	इताः	हताः
६०	११	वाहवश्छिन्न···	वाहवश्छिन्ना···
६१	१२	तुष्टुवुर्देवो	तुष्टुवुर्देवाः
६४	६	···भिर्हते	···भिर्हतः
६५	१२	श्वासनि	श्वासानि
६६	३	वकर्ष	चकर्ष
६६	१५	नेवता	देवता
७१	१२	पसन्ना	प्रसन्ना
७६	१४	शाब्दिता	शब्दिता
८५	१३	भातृ	भ्रातृ
६३	२	उच्चै	उच्चै
६५	१	मयोक्तं	मयोक्तं
६८	६	तमस्सुरं	तमसुरं
१००	२	···श्युद्यतायुधा	···श्युद्यतायुधः
१०१	१०	···कहेस्तेन	···कहस्तेन
१०३	६	मुण्डं	मुण्डं च
१०५	८	ननादृस्य	ननादृश्य
१०५	१४	विस्तरितानना	विस्तारिताना
१०८	१०	पृव्व्यां	पृथ्व्यां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पेज	हरफ	भएको	हुनुपर्ने
११५	८	रपतयत	रपातयत
११५	१६	विधायिनी	विधायिना
११८	२	नस्वैरूग्रं	नखैरूग्रं
१२७	१७	महावक्रे	महावक्त्रे
१२८	६	दुर्गे नि	दुर्गेति
"	११	रविराजिते	रपिराजिते
"	१५	लक्ष्मी	लक्ष्मि
१२६	५	ब्रह्मादि	ब्राह्मचादि
"	५	संकाशे	संकाशे
१३२	१०	हतिष्यामि	हनिष्यामि
"	१५	शतबार्णि	शतवार्षि
१३३	२	भविष्यामि	भरिष्यामि
"	२	शाकैशवृष्टेः	शाकैरावृष्टे
१३८	५	कृतास्तातु	कृतास्तास्तु
१३६	१	चण्डि	चण्ड
"	६	प्रसूतते	प्रसूयते
१४३	८	बरोऽस्मन्ता	बरोऽस्मत्ता
१४७	१	चैंकवारी	चंकवीरा
१५२	१६	ननादशा	दशानना
१५३	१०	धूपैर्दिपैश्च	धूपैर्दीपैश्च
"	१४	देव्याश्छिन्ना	देव्याश्छिन्न
१५४	४	वीतेसां	वीतेतां
"	१२	धिमां	धीमां
१५५	२	यथोत्केन	यथोक्तेन
१६५	१०	पौरश्चारणी	पौरश्चारणि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

पेज	हरफ	भएको	हुनुपर्ने
१६५	१५	कारयेन्ति	कारयेन्नि
१६७	३	रिपोर्वंश्यं	रिप्रर्वंश्यं
,,	४	सौव्यं	सौख्यं
,,	१७	सुव्रेत्त	सुव्रत
१६८	६	सुकीर्तिनां	सुकीर्तीनां
,,	१४	ध्रूत्रमूच्चा	धुत्रमुच्चा
१६६	२	बैरि	वारि
१७०	१	विषयकामास्तु	विषयकामस्तु
,,	२	वंशःछिद्यते	वंशःशिछद्यते
,,	६	कसृंख्यया	कसंख्यया
१७१	१०	विधानव्या	विधातव्या
,,	११	कृततर्पणम्	कृततर्पणाम्
,,	१२	रत्नाद्यं	रत्नाढ्यं
,,	१७	चरित्रयम्	चरितयम्
१७२	८	परिमार्ज्या	परिमार्ज्यं
,,	६	प्रागग्राश्चव	पागग्रास्त्व
१७३	१	पातत्रतःपूर्वे	पातत्रः पूर्वेः
,,	१०	मिस्रयण	धिस्रयणं
,,	१३	श्रुवयोस्तापनं	श्रुचयोस्तापनं
१७४	११	ऐन्द्रि	ऐन्द्री
१७६	३	वृषवाहना	मृगवाहना
,,	५	सुरजेष्ठा	सुरज्येष्ठा
,,	८	रत्नाद्यं	रत्नाढ्यं
१७७	१४	नृपो द्रव	नृपोपद्रव
१७६	३	पातक्रकच	पातकर्कच

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पेज	हरफ	भएको	हुनुपर्ने
१७६	४	उतराभि	मुतराभि
,,	१७	कुर्यान्त्रि	कुर्यान्तित्र
१८०	४	किंकिनी	किंकिणी
,,	१०	द्वारवेद्याढ्यं	द्वारवेद्याद्यं
१८१	५	लक्षनान्विता	लक्षणान्विता
१८२	२	पाठनोऽ	पाठो`सोऽ
१८३	३	कुर्यान्तु	कुर्यात्तु
,,	७	पुण्यावाचनक	पुण्याहवाचन
,,	१०	मण्डलस्था	मण्डलस्या
,,	१०	सुरेश्वरी	सुरेश्वर
,,	१५	दिव्यवस्तु	दिव्यवस्त्र
१८५	१	त्वकामेन	...त्वकामे च
१८७	४	नाशिकां	कशिकां
१८६	१७	शोअनम्	शोभनम्
१६०	१	धृतसर्करान	धृतशर्करान
,,	५	समर्चयेत्	समर्पयत्
,,	१७	×	दुर्गाया दीपदान विधि
१६२	२३	त्वदुर्योगे	तु दुर्योगे
१६३	१	धनार्थि	धनार्थी
१६४	६	शास्त्र समं	शास्त्रं मतं
,,	१६	ब्रह्मानि	ब्राह्मचावि

यस अलावा छाप्दा छाप्दै शिरविन्दु, रेफ, लके आदि टुट भई उप्की, भांची, उद्रेको र कुनै कुनै शब्दहरूमा केही सच्याए पुग्ने भएको हुँदा यस सूचीमा समावेश गरिएको छैन । विद्वान् तथा पाठकहरूले कष्ट उठाउनु पर्ने भएकोमा क्षमा प्रार्थी छु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चण्डीभक्तिविनोदिनी

शप्तशती चण्डी

श्री गणेशाय नमः ॥
ॐ नमश्चण्डिकायै ॥

स्वभक्तसंकलितचित्तवृतिं संपूरयन्तीं कृपया क्षणेन ॥
तपोलतामिन्दुविभूषणस्य वालामपर्णामहमाश्रयामि ॥

ख्याता सप्तशती समस्तभुवने संख्या न पूर्णा क्वचित् ॥
सम्यक् संशयशालिना ननु मया ग्रन्थैःकृतो निर्णयः ॥
ज्ञात्वा सप्तशती प्रमाणमधुना श्लोकाः पुनर्लेखिता ॥
स्तस्मात्सप्तशतीतिपाठविषये नासंगतिः काचन ॥

सप्तशतीति तालव्यं दन्त्यमुक्तं प्रमाणतः ॥
सन्देहो नात्र कर्त्तव्यः प्रमाणमुभयं मतम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

भूपालेन्द्रमहेश्वरेण बलिते नेपालभूमण्डले ॥
कान्तीनामपुरे सुखैकनिलये पीठैः समस्तैर्युते ॥
चण्डीभक्तिपरेण चारु नवमीसिंहेन संमन्त्रिणा ॥
तेने भक्तिविनोदिनी च सकलान्याहृत्य तन्त्राण्यहो ॥
मरीचकल्पे ॥

ब्रह्मलोके सुखासीनं सुरासुरगुरुं प्रभुम् ॥
अगस्त्यः परिपप्रच्छ साष्टाङ्गं प्रणिपत्य च ॥
अगस्त्यश्च पुलस्त्यश्च दुर्वासारण्यकादयः ॥
एवमादिमुनीन्द्राणां वृन्दमध्ये पितामहम् ॥
पप्रच्छ तं मुनिश्रेष्ठमगस्त्यश्च महात्मवान् ॥
अगस्त्य उवाच ॥

केनोपयेन देवेश महदैश्वर्यसम्भवम् ॥
ज्ञास्त्रज्ञानं कवित्वञ्च शत्रुनिग्रहणन्तथा ॥
वश्याकर्षणविद्वेषस्तम्भनोच्चाटनानि च ॥
स्तम्भनं परसैन्यस्य स्वसैन्यस्य च रक्षणम् ॥
एतत्सर्वं सुनिश्चित्य वद मे सुरपूजित ॥
ब्रह्मोवाच ॥

साधु पृष्टं त्वया विप्र वक्ष्यामि सकलं तव ॥
पार्वत्यै परमप्रीत्या शम्भुना कथितं पुरा ॥
कैलाशशिखरे रम्ये पार्वत्या सह संस्थितः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सर्वलोकोपकारार्थं प्रोवाच वृषभध्वजः ॥

श्रीदेव्युवाच ॥

कैलाशपीठमध्यस्थं वीरेशं परमं प्रभुम् ॥
उक्ता या तु महाविद्या मूलमन्त्रं त्वया प्रभो ॥
एतन्मे संशयं देव वक्तुमर्हसि शूलभृत् ॥

श्रीईश्वर उवाच ॥

साधु देवि महाप्राज्ञे अपूर्वं परिपृच्छसि ॥
प्रवक्ष्यामि न सन्देहो येन सिद्ध्यन्ति साधकाः ॥
सप्तमत्यास्तु सकलं तत्त्वं वेद्म्यहमेव हि ॥
पादोर्द्धं श्रीहरिर्वेत्ति वेत्यर्धं तु प्रजापतिः ॥
व्यासस्तूर्यांशकं वेति कोट्यंशमितरे जनाः ॥
कलौ न चंडीसदृशी सिद्धिदा भुवनत्रये ॥
वामदक्षिणमार्गाभ्यामधिकारि फलप्रदा ॥
इति मेरूतन्त्रे ॥

अथ सप्तशती श्लोक व्यवस्था ॥

शम्भुनित्यातन्त्रे ॥

आद्यं तन्त्रं विजानीहि सप्तशत्याः शुभावहम् ॥
सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः ॥
उवाचादिविना सप्तशतश्लोकसुसंख्यकम् ॥
मार्कण्डेयस्य वाक्यानि प्रथमाध्यायके भवेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

त्रयोविंशतिसंख्या स्यान्नागसंख्यातयोः पृथक् ॥
विधेर्वाक्यं कलासंख्या विष्णोश्चैकं तथा मधोः ॥
मुनेस्त्वेकोनत्रिंशः स्यात्षडशीतिरितीरिताः ॥
द्वितीये तु सुरेशानि एकशप्ततिरिष्यते ॥
तृतीये तु महादेवि देव्या वाक्यं तथैकम् ॥
महिषासुरवाक्यानि श्लोकत्रयमुदाहृतम् ॥
सप्ताधिचत्वारिंशत्स्यादेकाधिकश्चतुर्थके ॥
देव्यावेदमुनेस्त्वेकं देवानां सर्वमेवहि ॥
पंचमेऽध्यायके सप्तचत्वारिंशत्शतोत्तरम् ॥
ऋषेस्तु मातृकासंख्या देवानामष्टसप्ततिः ॥
देव्यास्तु ऋतुसंख्या स्याद्दूतस्य च त्रयोदश ॥
षष्ठे तु विंशतिः प्रोक्तं सप्तमे रसविंशतिः ॥
अष्टमे रसषष्टिः स्याच्चत्वारिंशश्चरत्नके ॥
दशमेऽष्टाविंशतिरेकादशे भूमिसप्ततिः ॥
नवत्रिंशद्वादशे स्यात्ततो ह्यष्टादश स्मृतः ॥
एवंसप्तशतिः प्रोक्तंमथर्व शिरसि स्थितम् ॥
त्रैलोक्येऽन्येषु तन्त्रेषु गोपितं तेषु दुर्ल्लभम् ॥
एवं भूता महाचण्डी ह्यचिरात्सिद्धिदा भवेत् ॥

मेरूतन्त्रे तु ॥

सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

छन्दो गायत्रमुदितं महाकाली तु देवता ॥
वाग्बीजं पावकस्तत्त्व धर्मार्थे विनियोजनम् ॥
प्रयोगाणां तु नवतिर्मारणे मोहनेऽत्र तु ॥
मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतम् ॥
उष्णिक्छन्दो महालक्ष्मीर्देवता बीजमद्रिजा ॥
वायुस्तत्त्व धनप्राप्त्यै विनियोग उदाहृतः ॥
उच्चाटे स्तम्भने चात्र प्रयोगाणां शतद्वयम् ॥
उत्तरस्य चरित्रस्य मुनिः शंकर उच्यते ॥
महासरस्वती देवी त्रिष्टुप्छन्द उदाहृतम् ॥
कामो बीजं रविस्तत्त्वं कामाप्त्यै विनियोजनम् ॥
महाविद्येत्यादि सप्तमत्यः कल्पे तथाऽऽदिमे ॥
ब्रह्मेन्द्रगुरुशुक्राणां विष्णुरुद्रसुरद्विषाम् ॥
उपास्या देवता जातास्ताश्चात्र ब्रह्मणा स्तुताः ॥
तस्मात्सप्तसतीत्येवं व्यासेन परिकीर्त्तिता ॥
सौम्यानि यानि रूपाणीत्यत्रापि परिकीर्त्तिता ॥
उपास्या दक्षणे मार्गे लक्ष्म्याद्याः सप्त शक्तयः ॥
लक्ष्मीश्च ललिता काली दुर्गा गायत्र्यरून्धती ॥
सरस्वती चेति सप्त ह्युपास्या वाममार्गतः ॥
काली तारा छिन्नमस्ता सुमुखी भुवनेश्वरी ॥
बाला कुब्जेति मनवःसूचिताऽत्र[1] प्रकीर्तिता ॥

---

१ पा-सं.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नाम्ना सप्तशती चेति मध्यमे चरिते द्विधा ॥
तत्तत्तन्त्रोक्तसंकेतैर्मन्त्रव्यक्तिः[1] प्रजायते ॥
एवं स्तवाभियुक्तानामित्यारभ्य तृतीयके ॥
चरिते सप्तसत्यस्तु चामुण्डान्ताः प्रकीर्तिताः ॥
हंसयुक्तविमानाग्ने इत्यारभ्य प्रकीर्तिताः ॥
ब्रह्माण्याद्याः सप्तसत्यो वर्त्तमानास्तु तत्र च ॥
वैवस्वतेन्तरे प्राप्ते इत्यारभ्य तु सप्त च ॥
सत्यः प्रोक्ताः स्वयं देव्यास्तस्मात्सप्तसती मता ॥

शम्भुनित्यातन्त्रे ॥

अथातः संप्रवक्ष्यामि चण्डिकां भक्तवत्सलाम् ॥
योनिद्वयं कलाबिन्दुनादनादान्तसंयुतम् ॥
लज्जाबीजं कामराजं ङेन्तं चामुण्डिकापदम् ॥
विच्चे नवार्णकं त्वेकं श्रीमायाकालिकाद्वयम् ॥

मेरुतन्त्रे ॥

अथातः संप्रवक्ष्यामि चामुण्डाया महामनुम् ॥
नवदुर्गात्मकं यस्य सेवनाद् भुक्तिमुक्तयः ॥

सप्तशतीकल्पे ॥

येन विज्ञानमात्रेण परमैश्वर्यवान्भवेत् ॥

---

१ श–पा.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऐंबीजमादीन्दुसमानदीप्तं ।
ह्रौं सूर्यतेजोद्युतिमद्द्वितीयम् ॥
क्लीँ मूर्त्तिवैश्वानरतुल्यरूपं ।
तृतीयमानंत्यसुखामनित्यम् ॥
चाशुद्धजाम्बूनदकान्तिवीर्यं ।
मुपञ्चमं रक्ततरं प्रकल्पम् ॥
डायष्ठिमुग्रार्तिहरं सुनीलं ।
यै सप्तमं कृष्णतरं रिपुघ्नम् ॥
सुपाण्डुरं व्यष्टममादिसिद्धं ।
च्चेभ्रमवर्णं नवमं विशालम् ॥
एतानि बीजानि नवात्मकस्य ।
जप्तुः प्रदद्युः सकलार्थसिद्धिम् ॥
नवबीजविशुद्धोऽयं मन्त्रस्त्रैलोक्यपावनः ॥

मेरूतन्त्रे ॥

सुरथो यत्प्रसादेन राज्यं प्राप्याभवन्मनुः ॥
संसारबन्धनिर्नाशि ज्ञानमाप्तं समाधिना ॥
मार्कण्डेयपुराणोक्तं चरित्रत्रितयं तव ॥
जपाद्यस्य फलं दद्यात्तं मनुं वच्मि साम्प्रतम् ॥
वाग्लज्जाकामबीजानि चामुण्डायै पदं वदेत् ॥
विच्चेनवार्णमन्त्रोऽयं शक्ति मन्त्रोत्तमोत्तमः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
हादिमतं ॥

एवं जपति यो मन्त्री फलं तस्य वदामि ते ॥
वश्या भवन्ति कामिन्यो राजानोऽनुचरा इव ॥
न हस्तिसर्पदावाग्निचौरराजभयादिकम् ॥
सर्वाः समृद्धयस्तस्य जायन्ते चण्डिकाऽऽज्ञया ॥
नश्यन्ति दारुणा रोगाः संग्रामे जयमस्तु ते ॥

महाकालसंहितायां ॥

न शास्त्रमालोक्य वदेन्नाचरेन्न जपेदपि ॥
न पश्येन्नोपदिश्याच्च न कुर्योन्नैव साधयेत् ॥
गुरूपदेशतो लब्धं जपन्यासार्च्चनादिकम् ॥
पश्चात्तत्साधयेत्सर्वं सदा तद्भावभावितः ॥

वाराहीतन्त्रे ॥

दीक्षामूलं जगत्सर्वं दीक्षा हि परमं तपः ॥
दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे नरः ॥
कोटिजन्मकृतं पापं ज्ञानाज्ञानकृतं च यत् ॥
दीक्षाग्रहणमात्रेण पलायन्ते न संशयः ॥
ततो वाञ्छितसिद्धिः स्याद्धनधान्यसमृद्धयः ॥
अन्ते देवालयं याति दिव्यभोगसमन्वितः ॥

महाहारके तन्त्रे ॥

अथ दीक्षाविहीनो यो वर्त्तते भुवि पापभुक् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

मोहान्धकारि नरके गते पतति दुर्मतिः ॥

दीक्षाहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥
यदन्यत्कुरुते मोहान्न तस्य फलभाग्भवेत् ॥

तन्त्रराजे ॥

आचार्यादनभिप्राप्तः प्राप्तश्चादत्तदक्षिणः ॥
सततं जप्यमानोऽपि मन्त्रसिद्धिं न गच्छति ॥

मार्कण्डेय ऋषिरुवाच ॥

परिपृच्छसि राजेन्द्र चण्डिकापूजनादिकम् ॥
तदहं संप्रवक्ष्यामि यथावदनुपूर्वशः ॥
आदौ नत्वा महालक्ष्मीं[1] कर्त्रीं हर्त्रीं सदोदितां ॥
यन्नमस्कारतो यज्ञा भवन्ति सुकृताः सकृत् ॥

शम्भुनित्यातन्त्रे ॥

कराङ्घ्रिक्षालनश्चास्त्रात् हृदः शुद्धिस्तु मन्मथात् ॥
मुखास्य क्षालनं श्रीवागुर्ध्वकेशी शिखाशिखा ॥
नद्यादौ विधिवत्स्नात्वा नाभिमात्रांभसि स्थितः ॥

सप्तशतीकल्पे ॥

नमते कीर्त्यते यस्यामैश्वर्यपरिधानवान् ॥
दशांजलिभिरात्मानं नववीजेन प्लावयेत् ॥
कृत्वा माध्यान्हिकं सर्वमुदकान्ते समाहितः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
तर्पणादिमहालक्ष्म्याः षडङ्गन्यासमाचरेत् ॥
ॐमायाबीजं चण्डिकायै अंगुष्ठाभ्यां नमः ॥
ॐ मायाबीजं हृदयम् ॥
एवं न्यासविधिं कृत्वा ध्यात्वा महिषमर्दिनीम् ॥
चण्डिकां त्रिजगद्धात्रीं ब्रह्माद्यमरवन्दिताम् ॥
ततो हि नवबीजान्ते चण्डिका तृप्यतामिति ॥
जलाञ्जल्याष्टोत्तरशतं सुगन्धकुसुमान्वितम् ॥
अशक्तौ तु तदर्द्धेन तत्तदर्द्धेन वा पुनः ॥
महालक्ष्मीं तर्पयित्वा प्रार्थितान् लभते ध्रुवम् ॥
अप्राप्यानपि कामाँश्च कर्त्ता प्राप्नोति तर्पणात् ॥
प्रविश्य देवतागारं वितानपरिशोभितम् ॥
पुष्पप्रकरशोभाढ्यं पूजाद्रव्यैः प्रपूरितम् ॥
बहुदीपप्रकाशाढ्यं दिव्यधूपैः सुधूपितम् ॥
तत्रोपविष्टो विधिना पूजयित्वा हरीश्वरौ ॥
उपविश्यासनं मन्त्री प्राङ्मुखो धृतिमान् शुची ॥
कामक्रोधमहामोहलोभतापविवर्जितः ॥
चतुरस्रे समे शुद्धे सर्वदोषविवर्ज्जिते ॥
लिखेदष्टदलं पद्मं कुंकुमागुरुचन्दनैः ॥
पद्ममध्ये लिखेच्चक्रं षट्कोणं चण्डिकालयम् ॥
षट्कोणचक्रमध्यस्थामाद्यबीजत्रयं न्यसेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूर्वादिषु षट्कोणेषु बीजान्येतानि विन्यसेत् ॥
गुदमेढ्रांतरं वामपादमूलेन पीडितम् ॥
वामपादोपरिस्थाप्य दक्षिणं चरणं दृढम् ॥
एतत्पद्मासनं नाम जरामरणवर्जितम् ॥
मौनी बद्धासनो ज्ञानी ध्यानी निश्चलविग्रहः ॥
अनाहतविशुद्धाज्ञां भेदयित्वा यथाक्रमम् ॥
स्वशरीराद्विनिर्गत्य सूक्ष्मरूपोर्ध्वमार्गतः ॥
ततो नदीं समुत्तीर्य स्थित्वा स्वकरसंपुटे ॥
शोधयेत्पञ्चभूतानि ज्ञात्वा वर्णक्रमैः पृथक् ॥
पृथिव्यापोऽनलो वायुः सभूतानामयं क्रमः ॥
पृथ्वीपीतासितं वारि रक्तवर्णो हुताशनः ॥
तेषां कृष्णतरो वायुराकाशं निर्मलं सदा ॥
मनसा शोधयेद् बुद्धिं बुध्या संशोधयेन्मनः ॥
तद्द्वयं परमं शुद्धमात्मना सम्यगीरितम् ॥
स्वदेहं ब्रह्ममार्गेण योगयुक्त्या समाविशेत ॥
सुषुम्णस्थानमाश्रित्य तिष्टमानमनाहते ॥
आदौ संशोधयेत्पृथ्वीं शोषदाह[1] प्लवामृतैः ॥
पुनर्वारि पुनस्तेजः पुनर्वायुं तु पावयेत् ॥
बीजैश्चतुर्विधैर्वायोरग्नेर्वरुणशक्रयोः ॥

---

१ पा.-जल

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यमिदं शोषकं बीजं रमिदं दाहकं महत् ॥
लमिदं प्लावनं बीज वमिदमसृतात्मकम् ॥
एवं शुद्धानि भूतानि भवन्ति नृपनन्दन ॥
व्योम्नि संशोधनं नास्ति यतस्तं निर्मलं सदा ॥
कृत्वालयं स्वकं देहे प्रविश्यात्मविशोधनम् ॥
कर्तव्यं योगमाश्रित्य सर्वकामविवर्जितैः ॥
भूतशुद्धिमिमां कृत्वा यः कुर्य्याच्चण्डिकार्चनम् ॥
तस्याचिरेण कालेन महालक्ष्मीः प्रसीदति ॥

शम्भुनिर्य्यातन्त्रे ॥

त्रिकोणं चैव षट्कोणं वृत्तं वसुदलं पुनः ॥
वृत्तं दिग्द्वारसंयुक्तं भूपुरं च समालिखेत् ॥
त्र्युवेकादशविन्यासमाद्या वै मातृकादयः ॥

मेरूतन्त्रे ॥

ब्रह्माविष्णुमहेशास्तु मुनयोऽस्य प्रकीर्तिताः ॥
गायत्र्युष्णिगनुष्टुप्च छन्दस्त्रयमुदीरितम् ॥
देव्योऽस्य तु महाकाली महालक्ष्मीः सरस्वती ॥
नन्दा शाकंभरी भीमा शक्तित्रयमुदाहृतम् ॥
तिस्रोऽस्य शक्तयो दुर्गा भ्रामरी रक्तदन्तिका ॥
अग्निर्वायुभगास्तत्त्वं प्राग्वदृष्यादिकं न्यसेत् ॥
स्तनयोः शक्तिबीजानि तत्त्वानि हृदये पुनः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तत एकादशन्यासान्कुर्वीतेष्टफलप्रदान् ॥
प्रथमं मातृकान्यासं प्राक्प्रोक्तं तु समाचरेत् ॥
कृतेन येन देवस्य सारूप्यं याति मानवः ॥
अथ द्वितीयं कुर्वीत न्यासं सारस्वताभिधम् ॥
बीजत्रयं तु मन्त्राद्यं ताराद्दि हृदयान्तकम् ॥
षडक्षरो भवेन्मन्त्रो नवस्थानेषु विन्यसेत् ॥
कनिष्ठाऽनामिका मध्या तर्जन्यंगुष्ठयुग्मके ॥
करमध्ये हस्तपृष्ठे मणिबंधे च कूर्परे ॥
हृदयादिषडङ्गेषु जातियुक्तं पुनर्न्यसेत् ॥
अस्मिन्सारस्वते न्यासे कृते जाड्यं विनश्यति ॥
न्यासाः कार्याः सप्तसत्याः पाठे कामविशेषतः ॥
ततस्तृतीयं कुर्वीत न्यासं मातृगणादिकम् ॥
मायाबीजादिका ब्राह्मी पूर्वतः पातु मां सदा ॥ श्रा/-१
माहेश्वरी तथाऽग्नेयां कौमारी दक्षिणेऽवतु ॥
वैष्णवी पातु कौणप्यां[1] वाराही पश्चिमेऽवतु ॥
इन्द्राणी पावने कोणे चामुण्डा चोत्तरेऽवतु ॥
ऐशाने तु महालक्ष्मीरूर्ध्वं व्योमेश्वरी तथा ॥ २२।
सप्तद्वीपेश्वरी भूमौ रक्षेत् कामेश्वरी तथा ॥
तृतीयेऽस्मिन्कृते न्यासे त्रैलोक्ये विजयी भवेत् ॥

---

१ पा-नैर्ऋत्यां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

न्यासं चतुर्थं कुर्वीत नन्दजादिसमन्वितम् ॥
नन्दजा पातु पूर्वांगं कमलाङ्कुशमण्डिता ॥
खड्गपात्रकरा पातु दक्षिणे रक्तदन्तिका ॥
पृष्ठे शाकम्भरी पातु पुष्पपल्लवसंयुता ॥
धनुर्बाणकरा दुर्गा वामे पातु सदैव माम् ॥
शिरःपात्रकरा भीमा मस्तकाच्चरणावधि ॥
पादादिमस्तकं यावद्भ्रामरी चित्रकान्तिभृत् ॥
तुर्यं न्यासं नरः कुर्वन् जरां मृत्युं व्यपोहति ॥
ब्रह्माद्यमथ कुर्वीत न्यासपंचममुत्तमम् ॥
पादादिनाभिपर्यन्तं ब्रह्मा पातु सनातनम् ॥
नाभेर्विशुद्धिपर्यन्तं पातु नित्यं जनार्दनः ॥
विशुद्धेर्ब्रह्मरन्ध्रान्तं पातु रूद्रास्त्रिलोचनः ॥
हंसः पातु पदद्वन्द्वं वैनतेयः करद्वयम् ॥
चक्षुषी वृषभः पातु सर्वाङ्गानि गजाननः ॥
परापरौ देहभागौ पात्वानन्दमयो हरिः ॥
कृतेऽस्मिन्पञ्चमे न्यासे सर्वान् कामानवाप्नुयात् ॥
षष्ठं न्यासं ततः कुर्यान्महालक्ष्म्यादिसंयुतम् ॥
मध्यं पातु महालक्ष्मीरष्टादशभुजान्विता ॥
ऊर्ध्वं सरस्वती पातु भुजैरष्टाभिरूर्जिता ॥
अधः पातु महाकाली दशबाहुसमन्विता ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सिंहो हस्तद्वयं पातु परहंसोऽक्षियुग्मकम् ॥
महिषं दिव्यमारूढो यमः पातु पदद्वयम् ॥
महिषश्चण्डिकायुक्तः सर्वाङ्गानि ममावतु ॥
षष्ठेऽस्मिन्विहिते न्यासे सद्गतिं प्राप्नुयान्नरः ॥
मूलाक्षरन्यासरूपं ततः कुर्वीत सप्तमम् ॥
ब्रह्मरंध्रे नेत्रयुगे श्रुत्योर्नासिकयोर्मुखे ॥
पायौ मूलमनोर्वर्णान्स्ताराद्यानसमान्वितान्[1] ॥
विन्यसेत्सप्तमे न्यासे[2] कृते रोगक्षयो भवेत् ॥
पायुता ब्रह्मरंध्रान्तं पुनस्तानेव विन्यसेत् ॥
कृतेऽस्मिन्नष्टमे न्यासे सर्वदुःखं विनश्यति ॥
कुर्वीत नवमं न्यासं मन्त्रव्याप्तिस्वरूपकम ॥
मस्तकाच्चरणं यावच्चरणान्मस्तकावधि ॥
पुरो दक्षे पृष्ठदेशे वामभागेऽष्टशो न्यसेत्[3] ॥
मूलमंत्रकृतो न्यासो नवमो देवताप्तिकृत् ॥
ततः कुर्वीत दशमं षडंगन्यासमुत्तमम् ॥
मूलमन्त्रं जातियुक्तं हृदयादिषु विन्यसेत् ॥
कृतेऽस्मिन्दशमे न्यासे त्रैलोक्यं वशमानयेत् ॥
चण्डीपाठेऽपि कर्तव्या न्यासाः स्वेष्टप्रदायकाः ॥
दद्यान्यासोक्तफलदं कुर्यादेकादशं ततः ॥

---

१ पा०–विन्यसेत् सुधी २ पा०–नमोन्तान्सप्तमेस्मिन्स्तु ।
३ पा०–भागेषु सन्न्यसेत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
खड्गिनी शूलिनीत्यादि पठित्वा श्लोकपञ्चकम् ॥
आद्यं कृष्णतरं बीजं ध्यात्वा सर्वाङ्गकं न्यसेत् ॥
शूलेन पाहिनो देवीत्यादि श्लोकचतुष्टयम् ॥
पठित्वा सूर्यसदृशं द्वितीयं पृष्ठतो न्यसेत् ॥
ततः षडंगं कुर्वीत बिभक्तं मूलवर्णकैः ॥
एकेनैकेन चैकेन चतुर्भिर्युग्मकेन च ॥
समस्तेनैव मन्त्रेण कुर्यादङ्गानि षट्क्रमात् ॥
शिखायां नेत्रयोः श्रुत्योर्नासे वक्त्रे गुदे न्यसेत् ॥
मन्त्रवर्णान्समस्तेन व्यापकंत्वष्टशश्चरेत् ॥
शम्भुनित्यातन्त्रे ॥

एते न्यासाः प्रकर्तव्याश्चण्डीं सप्तशतीं जपेत् ॥
एवं न्यासविधिं कृत्वा सृष्टिमुद्रां विलोकयेत् ॥
तस्या विलोकने राजन् कृतो न्यासः स्थिरो भवेत् ॥
परिपिञ्चति पूजार्थं द्रव्याणि नवबीजतः ॥
दशन्यासैः कृतैरेतज्जपकर्ता फलं लभेत् ॥
तत्फलं लभते सत्यं तस्मिन्नेकादशे कृते ॥
तलपृष्ठोद्भवां मुद्रां दत्वाऽस्त्रेणावगुण्ठयेत् ॥
अर्घ्यपात्रं प्रतिष्ठाप्य पूरयेच्छुभवारिणा ॥
मन्त्रपुष्पाक्षतास्तत्र विन्यस्य नृपनन्दन ॥
ध्यात्वा सर्वाणि तीर्थानि हस्तौ दत्वाऽभिमन्त्रयेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
रक्षार्थं तस्य कर्त्तव्य चक्रमुद्रास्त्रसंयुताम् ॥
आर्घ्योदकेन संस्कारं पूजाद्रव्यस्य पूर्ववत् ॥
कृत्वा लोमविलोमाभ्यामात्मानं सम्यगर्चयेत् ॥
प्रन्यर्घ्यं संप्रतिष्ठाप्य मध्ये पीठार्घ्यपात्रयोः ॥
पट्कोणचक्रमध्यस्थां मध्यबीजैर्व्यवस्थिताम् ॥

मार्कण्डेयपुराणे ॥

महाकाल्या सरस्वत्याऽलंकृतं दीक्षणान्ययोः ॥
संयुक्तां दक्षिणे वामे सिंहेन महिषेण च ॥
अष्टादशभुजां ध्यात्वा महालक्ष्मीं प्रणम्य च ॥

मेरूतन्त्रे ॥

ततो देवीत्रयं ध्यायेत्कालिकाध्यानमुच्यते ॥
दशास्यां दशपादां च दशहस्तां विधिस्तुताम् ॥
इन्द्रनीलद्यूतिं खड्गं चक्रं शंखं शिरः शरान् ॥
दक्षहस्तेषु दधतीं गदां शूलं भुशुण्डिकाम् ॥
परिघांश्च धनुर्बाणैर्दधतीं ब्रह्मसंस्तुताम् ॥
मधुकैटभनाशार्थं सालङ्कारां त्रिवीक्षणाम् ॥
ततो ध्यायेन्महालक्ष्मीं महिषासुरमर्दिनीम् ॥
समस्तदेवतातेजोजातां पद्मासनस्थिताम् ॥
अष्टादशभुजामक्षमालां पद्मञ्च सायकान् ॥
खड्गं वज्र गदां चक्रं दक्षहस्तैः कमण्डलुम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
शङ्खं च दधतीं वामैः शक्तिञ्चापि शरं धनुः ॥
चर्मदण्डौ सुरापात्रं घण्टां पाशं त्रिशूलकम् ॥
सरस्वतीं ततो ध्यायेच्छरच्चन्द्रसमप्रभाम् ॥
शंखं च मुशलं चक्रं वाणान्दक्षेषु बिभ्रतीम् ॥
घण्टां शूलं हलञ्चापं वामहस्तेषु बिभ्रतीम् ॥
गौरीदेहसमुद्भूतां नृणामानन्ददायिनीम् ॥
आधारभूतां जगतः शुम्भादिकविमर्दिनीम् ॥
अधिष्ठात्रीं तृतीयस्य चरित्रस्य स्मरेत्सदा ॥

प्रतिष्ठात्वा ॥

शम्भुनित्यातन्त्रे ॥

पीठानां पूजनं कृत्वा स्वबीजेन पृथक्पृथक् ॥
ॐकारबिन्दुमध्यस्थं नामधेयाद्यमक्षरम् ॥
देवतानां स्वबीजं च पूजायां ऋद्धिसिद्धिदम् ॥
ॐकारं प्रथमं पीठं पूर्णपीठं तत परम् ॥
तृतीयं कामपीठं च पूजयेत्संप्रदायतः ॥
पूर्वादिदिक्षु पीठस्य गणेशादिचतुष्टयम् ॥
गणेशक्षेत्रपालौ च पादुकौवटुकाश्रियैः[1] ॥
आग्नेयादिचतुर्दिक्षु पूज्यं देवीचतुष्टयम् ॥
आद्या तन्त्र जया प्रोक्ता द्वितीया विजया स्मृता ॥

१ पा० गणेश क्षेत्रपालौ च पादुकौ वटुक श्रियौः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

जयन्ती तत्परा देवी चतुर्थी वापराजिता ॥
पूज्या नामपदैर्दिव्यैः पीठपंकजमध्यगाः ॥
प्रागादिक्रमयोगेन पञ्चषट् षट्चसप्त च ॥
प्रथमा विष्णुमाया च द्वितीया चेतना स्मृता ॥
बुद्धिर्निद्रा क्षुधाच्छाया शक्तिस्तृष्णाष्टमी ततः ॥
कान्तिर्जातिस्ततो लज्जा शान्तिः श्रद्धा त्रयोदशी ॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा स्मृतिरेव दया तथा ॥
तुष्टिः पुष्टिश्च मातृ च भ्रान्तिर्नाम पदक्रमात् ॥
त्रयोविंशति संख्येयं ब्रह्मणा पूजिताः स्तुताः ॥

मेरुतन्त्रे ॥

..... अथ तद्बाह्ये पञ्च[1]विंशदलेऽर्चयेत् ॥
विष्णुमायां चेतनां च बुद्धिं निद्रां क्षुधान्तथा ॥
छायां शक्तिं परां तृष्णां चान्तिं जातिं ततुत्तरम् ॥
लज्जां शान्तिं तथा श्रद्धां कीर्तिं[2] लक्ष्मीं धृतिं तथा ॥
वृत्तिं श्रुतिं[3] स्मृतिं चापि दयां तुष्टिं ततः परम् ॥
पुष्टिं च मातरं भ्रान्तिमर्चयेत् .... ॥
इति पञ्चविंशत्रयोविंशयोर्विकल्पः ॥

हादिमते ॥

नालमूले च संपूज्यमाधारादिचतुष्टयम् ॥

---

१ पा०-चतुर्विंश २ पा०-कान्ति ३ पा०-स्मृतिं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

आधारं कुर्मशेषौ च चतुर्थी पृथिवी नृप[1] ॥
ततो नालं समभ्यर्च्य पद्मं संपूज्य यत्नतः ॥
ज्ञानामृतसुतृप्तात्मा मण्डलार्चनमारभेत् ॥
अर्घ्योदकाम्बिरासिंच्य मण्डलं सौम्यदृष्टिमान् ॥
पूर्वपत्रादितः पूज्यं मातृणां मण्डलं शिवम् ॥
रहस्यकथितैर्बीजैः स्वबीजेनाथ वा पृथक् ॥
आद्यपत्रे समभ्यर्च्य ब्रह्माणीं हंसवाहनाम् ॥
माहेश्वरी वृषारूढा पूज्या साहुतभुग्दले ॥
मयूरवाहना पूज्या कौमारी दक्षिणे दले ॥
नैऋत्ये वैष्णवी पूज्या गरुडोपरि संस्थिता ॥
पश्चिमे यज्ञवाराही[2] दंष्ट्रोद्धृतवसुन्धरा ॥
समीरणदले तोष्या नारसिंही घनस्वना ॥
गजराजसमारूढा पूज्यैन्द्री सामदिग्दले ॥
गणनाथपरीवारा सदा रुद्रेण संयुता ॥
ईशपत्रे समभ्यर्च्य चामुण्डा मुण्डमण्डिता ॥
ब्रह्माणी कर्णिका मध्ये क्रमात्षट्कोणपूजनम् ॥
नन्दजा हेमगर्भाभा सुरक्ता रक्तदन्तिका ॥
नीला शाकंभरी दुर्गा सर्वदुर्गार्तिहारिणी ॥
दंष्ट्राचितमुखी भीमा नीलपत्रशिरोधरा ॥

---

१ पा–चक्र २ पा० आधारं कुर्मशेषौच चतुर्थीं पृथिवी नृप।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तेजोमण्डलदुर्दर्शा भ्रामरी वरदाचिता ॥
आद्यावीजे महाकालीं ध्यानपूर्वं समर्चयेत् ॥
द्वितीयवीजे तत्पूर्वं महालक्ष्मीं अपूजयेत् ॥
तृतीयेऽष्टभुजां ध्यात्वा समभ्यर्च्य सरस्वतीम् ॥
ततः पृथक् पृथक् पूजां कृत्वा महिषसिंहयोः ॥
मध्यवीजं चिरं ध्यात्वा महालक्ष्मीं दयानिधिम् ॥
आह्वानपूर्वकं दद्यादासनं मणिभूषितम् ॥
मण्डलस्था तु यो देवी पीठस्था सर्वशस्तदा ॥
महालक्ष्म्या सहैक्येन चिंतयेद्योगमुद्रया ॥
एकाक्षरं महालक्ष्म्या रूपं ध्यात्वा परात्परम् ॥
मुद्रास्तु चायुधाकाराश्चण्डिकाग्रे प्रदर्शयेत् ॥
अष्टादशाक्षमालाढ्यास्ततः पाद्यं प्रकल्पयेत् ॥
बलिपुष्पाक्षतारुकचन्दनैश्च प्रकल्पितम् ॥
अर्घ्यं दत्वा महालक्ष्म्यै धेनुमुद्रां प्रदर्शयेत् ॥
संकल्पाचमनं देविस्नानं पुष्पाभिषेचनम् ॥
विदध्याद्धेधसी मुद्रा यथा माता प्रतुष्यति ॥
महार्हं चित्रितं वासो विचित्राभरणानि च ॥
कस्तूरीकुंकुमोपेतं कर्पूरागुरुचन्दनम् ॥
सुरभीणि सुपुष्पाणि विल्वपत्राक्षतानि च ॥
नैवेद्यं चण्डिकादेव्यै दिव्यैर्धूपैश्च धूपितम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ज्वलन्मणिशिखाकारैर्दीपनीराजनैः शुभैः ॥
यथावर्णा क्रमोपेतैर्नैवेद्यैः पायसादिभिः ॥
अनेकरसपक्वान्नैर्महालक्ष्मीं प्रतोषयेत् ॥
प्रणम्याचमनं दत्वा चन्दनं मुखवासनम् ॥
सकर्पूरं च ताम्बूलं भक्तिभावसमन्वितम् ॥
दिगीशानि समभ्यर्च्यैतदस्त्राणि यथाक्रमम् ॥
मार्कण्डेयपुराणे ॥

प्राणान्नियम्यपूर्वोक्तं न्यासान्संस्मृत्य चात्मवान् ॥
प्रथमं चरितं प्रोक्तं मधुकैटभनाशनम् ॥
महिषासुरनिर्नाशं चरितं विद्धि मध्यमम् ॥
चरितमुत्तरं विद्धि निशुंभादिवधाश्रितम् ॥
चरितानि जपेत् त्रीणि सरहस्यां विशेषतः ॥
चरितं मध्यमं चैषां जपेद्वा चण्डिकामयम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ पाठनियमः

वाराहीतन्त्रे ॥

आधारं स्थापयित्वा तु पुस्तकं वाचयेत्स्फुटम् ॥
हस्ते संस्थापनाद् देवीं हरत्यर्द्धफलं यतः ॥
यावन्न पूर्यते पाठस्तावन्न विरमेत्सुधीः ॥
अनुक्रमं पठेद् देवि शिरःकम्पादिकं त्यजेत् ॥
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ॥
अनर्थज्ञोऽल्पबुद्धिश्च षडेते पाठकाधमाः ॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ॥
सानुस्वारी च दीर्घी च षडेते पाठकाः शुभाः ॥
प्रमादादध्यायमध्ये तु विरमान्तरतः प्रिये ॥
पुनरध्यायमावर्त्य पठेत्सर्वं स्तवेविधिः ॥

अथ मत्स्यसूक्ते ॥

शुद्धेनाचलचित्तेन पठितव्यो प्रयत्नतः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

न मानसं पठेत्स्तोत्रं वाचिकं तस्य शस्यते ॥
पुस्तकं पावनं श्रेष्ठं सहस्रं वाचिकं यदि ॥
अतो न्यूनं भवेद्यस्तु वाचिकं पुस्तकं विना ॥
आधारे स्थापयित्वा तु पुस्तकं पूजयेत्सुधीः ॥
हस्ते संस्थापनाद् देवि यस्मादल्पफलं भवेत् ॥
तत्स्वयं लिखितं तच्चा कृतिना लिखितं भवेत् ॥
अब्राह्मणेन लिखितं तत्सर्वं विफलं भवेत् ॥
न स्वयं च कृतं स्तोत्रमन्यथा विकृतं न च ॥
यस्मात्कलौ न प्रशस्तमृषिभिर्भाषितं पठेत् ॥
ऋषिच्छन्दादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ॥
स्तोत्रेण दृश्यते यत्र प्रभवन्तु समाचरेत् ॥
भीष्मपर्वणि या गीता सुप्रशस्ता कलौ मता ॥
विष्णोः सहस्रनामाख्यं स्तोत्रं पापप्रणाशनम् ॥
गजेन्द्रमोक्षणं चैव कारुण्यस्तवमेव च ॥
नारसिंहं तथा स्तोत्रं श्रीरामस्तवसंयुतम् ॥
देव्याः सप्तशती स्तोत्रं तथा नामसहस्रकम् ॥
श्लोकाष्टकं नीलकण्ठं शैवनामसहस्रकम् ॥
त्रिपुरायाः प्रसादाख्यं सूर्यस्य स्तवराजकम् ॥
पैत्रो रुचिस्तवो यश्च इन्द्राक्षीस्तोत्रमेव च ॥
वैष्णवे च महालक्ष्म्याः स्तोत्रमिन्द्रेण भाषितम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भार्गवाख्येन रामेण सप्तान्य ..... ॥
इत्युक्त्वा पार्वतीनाथ सप्तशत्या महाफलम् ॥
तस्य श्रवणमात्रेण सर्वरोगं प्रशान्तयेत् ॥

वाराहीतन्त्रे ॥

नातः परतरं किंचित्स्तोत्रमस्ति वरानने ॥
भुक्तिमुक्तिप्रदं पुण्यं पावनामां च पावनम् ॥

अथ पाठक्रमो यथा

हादिमते ॥
अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ॥
अर्गलं हृदये यस्य तथा नर्गलवानसि ॥
कीलकं हृदये यस्य सकीलितमनोरथः ॥
कवचं हृदये यस्य स वज्रकवची सुखी ॥

इति श्री नवमीसिंहकृतायां चण्डी भक्तिविनोदिन्यां प्रथमः पटलः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथार्गलास्तुतिः

मार्कण्डेय उवाच ॥

जयन्ती मङ्गला काली भद्रकाली कपालिनी ॥
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ॥ १
[1]मधुकैटभविद्राविविधातृ वरदे नमः ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ २
महिषासुरनिर्नाशि धूम्राक्षस्य विमर्दिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ३
चण्डमुण्डवधे देवि रक्तबीजविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ४
शुम्भस्यैव निशुम्भस्य सर्वदैत्यस्य पातिनि ॥
रूपं देहि जय देहि यशो देहि द्विषं जहि ॥ ५

---

१ पा० जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि ।
जय सर्वगते देवि कालरात्रि नमोऽस्तुते ॥
–इति अधिकपाठः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
वन्दितांघ्रियुगे देवि देवि सौभाग्यदायिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ६
अचिन्त्यरूपचरिते सर्वशत्रुनिवारिणि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ७
नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ८
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ९
चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १०
देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ ११
विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १२
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १३
सुरासुरशिरोरत्ननिघृष्टचरणाम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १४
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १६
प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १७
चतुर्भुजे चतुर्वक्त्रे संस्तुते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १८
कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ १९
हिमाचलसुतानाथसंस्तुते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ २०
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ २१
देवि भक्तजनोद्दामदत्तानंदोदयाऽम्बिके ॥
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥ २२
[1]पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ २३
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥
स च[2] सप्तशतीसंख्यावरमाप्नोति सम्पदाम् ॥ २४

---

१ पा० पुत्रान्देदि धनं देहि सर्वकामांश्च देहि मे ।
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥
२ पा० तु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ कीलकस्तुति

श्रीमार्कण्डेय उवाच ॥

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥
सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् ॥
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ॥
एतेन स्तुवतां देवीं स्तोत्रवृन्देन सर्वदा ॥
न मन्त्रो नौषधं तत्र न किंचिदपि विद्यते ॥
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥
समग्राण्यपि सेत्स्यंति लोकशङ्कामिमां हरः ॥
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम् ॥
स्तोत्रं वै चण्डिकायास्तु यच्च गुह्यं चकार सः ॥
समवाप्नोति पुण्येन तां यथावन्नियन्त्रणाम् ॥
सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ॥
कृष्णायाम्वा चतुर्दश्यामष्टम्यां वा समाहितः ॥
ददाति प्रतिगृह्णाति नान्यथैषा प्रसिध्यति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥
यो निष्कलां विधायैनां नित्यं जपति संस्फुटम् ॥
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ॥
न चैवाप्यटतस्तस्य भयं क्वापि हि जायते ॥
नाप्तमृत्युवशं याति ततो मोक्षमवाप्नुयात् ॥
ज्ञात्वा प्रारभ्य कुर्वीत अकुर्वाणो विनश्यति ॥
ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः ॥
सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने ॥
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥
शनैस्तु जप्यमानेऽस्मिन्स्तोत्रे संपत्तिरुच्चकैः ॥
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः ॥
शत्रुहानिः परा मोक्ष स्तूयते सा नु किं जनैः ॥
चण्डिकां हृदयेनापि यः स्मरेत्सततं नरः ॥
स्मृत्वा कामानवाप्नोति हृदि देव्या सदा विशेत् ॥
अग्रतो यं महादेवि कृत्वा कीलितकारणम् ॥
निष्कीलं च यथा कृत्वा पठितव्यं समाहितैः ॥
प्रथमं पठ्यते देव्याः स्नात्वा चैव शुभं भवेत् ॥
शुचिर्देव्या महाभक्त्या येनाभीष्टफलं लभेत् ॥

इतिकीलकस्तुतिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ कवचम्

मार्कण्डेय उवाच ॥
यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥
ब्रह्मोवाच ॥
अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ॥
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥
प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ॥
तृतीयं चण्डघण्टा[1] च कुष्माण्डी[2] च चतुर्थकम् ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ॥
सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥
नवमं सिद्धिदात्रीति[3] नवदुर्गा प्रकीर्तिताः ॥
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥

---

१ चन्द्रघण्टेति। २ कुष्माण्डेति। ३ सिद्धिदात्री च।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः ॥
न तेषां जायते किंचिदशुभं रणसंकटे ॥
नापदं तस्य पश्यामि शोकदुःखभयं न च[1] ॥
यैस्तु भक्त्या स्मृता नूनं तेषामृद्धिः[2] प्रजापते [3]॥
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥
ऐन्द्री गजसमारूढा वैष्णवी गरूडासना ॥
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहना ॥
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥
श्रेष्ठैश्च मौक्तिकैः सर्वैर्दिव्यहारप्रलंबिभिः ॥
इन्द्रनीलैर्महानीलैः पद्मरागैः सुशोभनैः ॥
दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ॥
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥
खेटकं तोमरं चैव परशुं पाशमेव च ॥
कुन्तायुधं च खड्गं च शार्ङ्गायु[4]धमनुत्तमम् ॥

---

१ पा० हि । २ वृद्धिः ।
३ पा० १ ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥
४ पा० शाङ्गमायु ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

खड्गं चर्म त्रिशूलं च पट्टिशं मुद्गरं तथा ॥
दैत्यानां देहनाशाय भक्तानामभयाय च ॥
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥
नमस्तेऽस्तु महावीर्ये[1] महाघोरपराक्रमे ॥
महाबले महोत्साहे महाभयविनाशिनि ॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ॥
प्राच्यां रक्षतु माहेन्द्री[2] आग्नेय्यां मेषवाहिनी[3] ॥
दक्षिणे चैव[4] वाराही नैऋत्यां खड्गधारिणी ॥
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥
उदीच्यां रक्ष[5] कौवेरी[6] ईशान्यां शूलधारिणी ॥
उर्द्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा ॥
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥
शिखां[7] मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥
मालाधरी ललाटे तु[8] भ्रुवौ रक्षेद् यशस्विनी ॥
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥

पा० १ महारौद्र २ मामैन्द्री ३ मग्निदेवता ४ वतु ५ पातु ६ कौमारी ७ शिखामु ८ च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नासिकायां सुगंधा च उत्तरोष्ठे च चर्चिका ॥
अधरे चामृतकला जिह्वायां च सरस्वती ॥
दन्तान् रक्षेत्तु कौमारी कण्ठमध्ये[1] तु चण्डिका ॥
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥
कामाक्षा[2] चिबुकं रक्षेद् वाचं मे सर्वमङ्गला ॥
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥
नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ॥
खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी ॥[3]
हस्तौ तु दण्डिनी रक्षेदम्बिका चाङ्गुली तथा ॥[4]
नखान् शूलेश्वरी[5] रक्षेत् कुक्षौ रक्षेन्नलेश्वरी[6] ॥
स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ॥
हृदये ललिता देवी उदरे शूलधारिणी ॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ॥
मेढ्रं च रक्षेदुर्गन्धा कट्यां भगवती तथा ॥
भूतनाथा च मेढ्रं च ऊरू मे मेघवाहना[7] ॥

पा० १ कण्ठदेशे २ कामाक्षी
३ स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥
४ हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ॥
५ नखाञ्शूलेश्वरी ६ रक्षात्कुलेश्वरी ७ मेघ वाहना
७ पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitized by eGangotri

जङ्घे महाबला प्रोक्ता सर्वकामप्रदायिनी ॥
गुल्फयोर्नारसिंही च पादपृष्ठे मितौजसी[२] ॥
पादाङ्गुलीः[३] श्रीधरी च[४] पादाधःस्थलवासिनी ॥
दंष्ट्रां करालिनी रक्षेत् केशांश्चैवोर्ध्वकेशिनी ॥
रोमकूपानि[५] कौबेरी त्वचं वागीश्वरी तथा ॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥
अङ्गानि[६] कालरात्रीश्च पित्तं च मुकुटेश्वरी ॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥
ज्वालामुखी नखज्वाला सर्वसन्धिषु ॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ॥
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ॥
वज्र हस्ता च मे रक्षेत्प्राणं कल्पं च[७] शोभना ॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥
आयुर्मे रक्ष[८] वाराही धर्मं रक्षतु वैष्णवी ॥
यशः कीर्तिं च लक्ष्मीं च सदा रक्षन्तु मातरः[९] ॥
गोत्रमिन्द्राणी मे रक्षेत्पशून्मे रक्ष चण्डिके ॥
पुत्रान् रक्षेन्महालक्ष्मी भार्यां रक्षतु भैरवी ॥

पा० १ रक्षत २ तु तैजसा ३ पादाङ्गुलीषु ४ श्री रक्षत ५ पेषु ६ अन्त्राणि ७ कल्याणं ८ आयु रक्षतु ९ धनं विद्यां च चक्रिणी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मार्गं क्षेमंकरी रक्षेद् विजया सर्वसंस्थिता ॥
सर्व रक्षाकरं पुण्यं कवचं सर्वदा जयेत् ॥
इदं रहस्यं परमं भक्त्या तव मयोदितम् ॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु[1] ॥
तत्सर्वं रक्ष मे देवि दुर्गे दुर्गार्तिहारिणी[2] ॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥
कवचेनावृतो नित्यं यत्र यत्रामि[3] गच्छति ॥
तत्र तत्रार्थलाभश्च विजयः सार्वकालिकः[4] ॥
यं यं चिन्तयते कामं तं तं प्राप्नोति लीलया[5] ॥
परमैश्वर्यमतुलं प्राप्नोस्य विकलं[6] पुमान् ॥
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतो हि यः[7] ॥
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥
यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः ॥
दैवी कला भवेत्तस्य त्रैलोक्ये चापराजितः[8] ॥
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥

---

१ पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ॥
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥
२ जयन्ती पापनाशनी ३ यत्रैव ४ सर्वकामिकः
५ निश्चितम् ६ प्राप्यते भूतले ७ कवचेनावृतः पुमान
८ ष्वपराजितः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ॥
स्थावरं जङ्गमं वाऽपि[1] कृत्रिमं चापि यद्विषम् ॥
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ॥
भूचराः खेचराश्चैव कुलजा[2]श्चोपदेशिकाः ॥
सहजा कुलजा माला डाकिनी शाकिनी तथा ॥
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥
ब्रह्मराक्षसवेतालाः कुष्माण्डा भैरवादयः ॥
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥
यशोवृद्धिर्भवेत्पुंसः कीर्तिवृद्धिश्च जायते[3] ॥
तस्माज्जपेत्सदा भक्त्या कवचं कामदं मुने ॥
जपेत्सप्तशतीं चण्डीं कृत्वा कवचमादितः[4] ॥
निर्विघ्नेन भवेत् सिद्धिश्चण्डीजपसमुद्भवा ॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्र पौत्रकी[5] ॥
प्राप्नोति परमं स्थानं यत्सुरै रपि दुर्लभम्[6] ॥

पा० १ चैव २ जलजा
३ यशसा वर्द्धते सोऽपि कीर्तिमण्डितभूतले ॥
४ तु कवचं पुरा ५ पौत्रिकी
६ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥
तत्पदं समवाप्नोति यावदाभूतसंप्लवम् ॥
ब्रह्मणा निर्मितं ह्येतत् कवचं वज्रसंमितम् ॥
त्रिसन्ध्यं कीर्तयेद्यस्तु प्राप्नोति परमां गतिम्[1] ॥

❋

इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवी महात्म्ये हरिहर ब्रह्म विरचितं श्री देव्याः कवच मिति सम्पूर्णम् ॥

पा० १ लभते परमं रूपं शिवेन सह मोदते ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चण्डीभक्तिविनोदिनी

सप्तशती चण्डी

श्री नवमीसिंह

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

प्रथमोऽध्यायः

विनियोगः

अस्य श्रीचण्डिकासप्तशतीप्रथमचरित्रस्य ब्रह्मा ऋषिः महाकाली देवता गायत्री छन्दः, नन्दजा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्वम्, श्रीमहाकालीप्रीत्यर्थे जपे विनियोगः ॥

नमश्चण्डिकायै

मार्कण्डेय उवाच ॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥१
महामायानुभावेन यथा मन्वन्तराधिपः ॥
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ॥
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥३

तस्य पालयतः सम्यक् प्रजाः पुत्रनिवौरसान् ॥
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥४

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ॥
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥५

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ॥
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥६

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥
× तनयैस्तु महावीर्यैर्वैरिपक्षवशंगतैः ॥७

कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥
ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ॥८

एकाकी हयमारुह्य जगाम गहनं वनम् ॥
स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ॥९

प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥
तस्थौ किंचित्स[1] कालं च मुनिना तेन सत्कृतः ॥१०

इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥
सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः[2] ॥११

पा० १ कंचित्स २ ममत्वाकृष्टचेतनः ॥ × यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× ममत्वं चाभवत्तस्य प्रयुक्तं विष्णुमायया ॥
× कथं नु वर्तते राज्यं बलादपहृतं परैः ॥१२

मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥१३

न जाने स प्रधानो मे शूरहस्ती सदामदः ॥
मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥१४

ये ममानुगता नित्यं प्रसादधनभोजनैः ॥
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥१५

× मम भार्या वरारोहा पुत्राश्चातीव शोभनाः ॥
× सद्मानि स्वर्गसदृशान्यप्सरप्रतिमाः स्त्रियः ॥१६

असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥
संचितः सोऽतिदुःखेन चयं कोशो गमिष्यति ॥१७

एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ॥
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥१८

स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥१९

× तत्त्वमाख्याहि भद्रं ते यत्ते मनसि वर्तते ॥
× भयमत्र नतेऽप्यस्ति यः शोकः स च नश्यति ॥२०

× यसमा बहि छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥२१

वैश्य उवाच ॥

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥२२
विहीनः स्वजनैर्दारैः[1] पुत्रैरादाय मे धनम् ॥
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥२३
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थिती[2] ॥२४
किं नु तेषां गृहे क्षममक्षेमं किं नु साम्प्रतम् ॥
कथं ते किं नु सद्वृत्ताः दुर्वृत्ताः किं नु मे सुताः ॥२५

राजोवाच ॥

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥२६

वैश्य उवाच ॥

एवमे तद्यथा प्राह भवानस्मद्गतं वचः ॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥२७

पा० १ विहीनश्च धनैर्दारैः २ संस्थितः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥२८

किमेतन्नाभिजानामि जानन्नपि महामते ॥
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥२९

तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥३०

मार्कण्डेय उवाच ॥

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥३१

कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥३२

राजोवाच ॥

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥३३

ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥३४

अयं च निकृतैः[1] पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥
स्वजनेन च संत्यक्तस्तेषु हार्दि तथाप्यति ॥३५

पा० १ निष्कृता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एवमेष तथाहं च द्वावप्यत्यन्तदुःखितौ ॥
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥३६
तत्केनैतन्महाभाग[1] यन्मोहो ज्ञानिनोरपि ॥
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥३७
ऋषिरुवाच ॥
ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥
विषयश्च[2] महाभाग याति[3] चैवं पृथक् पृथक् ॥३८
दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ॥
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥३९
ज्ञानिनो मनुजाः सत्यं किं तु[4] ते नहि केवलम् ॥
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥४०
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥४१
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ॥
कणमोक्षादतान्मोहात्पीड्यमानानपि क्षुधा ॥४२
मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ॥
लोभात्प्रत्युपकाराय नन्वेते[5] किं न पश्यसि ॥४३
तथापि ममतावर्ते मोहगर्ते निपातिताः ॥
महामायाप्रभावेण संसारस्थितिकारिणा[6] ॥४४

पा० १ तत्किमेतं २ विषयाश्च ३ यान्ति ४ किं नु ५ नन्वेतान् ६ रिणः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पते ॥
महामाया हरेश्चैषा[1] तया संमोह्यते जगत् ॥४५
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥४६
तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥४७
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥४८

राजोवाच ॥

भगवन् का हि सा देवी महामायेति यां भवान् ॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च[2] किं द्विज ॥४९
यत्प्रभावा[3] च सा देवी यत्स्वरूपा यदुद्भवा ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥५०

ऋषिरुवाच ॥

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥५१
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥५२

पा० १ चैतत् २ कर्म चास्याश्च ३ यत्स्वभावा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥
आस्तीर्य शेषमभजत्कल्पान्ते भगवान् प्रभुः ॥५३
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥५४
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥५५
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ॥
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥५६
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥
× स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसः[1] ॥५७

ब्रह्मोवाच ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिताः ॥५८
अर्द्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ॥
त्वमेव संध्या[2] सावित्री त्वं देवि जननी परा ॥५९
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥६०

पा० १ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥
२ सा त्वं × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥६१

महाविद्या महामाया महामेधा महास्मृतिः ॥
× महामारी महावीरा महाहिकृतभूषणा ॥६२
× महामाया महाचण्डी महादेवानुसेविनी ॥
महामोहा च भवती महादेवी महासुरी[1] ॥६३

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥६४

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥६५

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥६६

सौम्या सौम्यतराशेषसोम्येभ्यस्त्वतिसुन्दरी ॥
परापराणां परमा त्वमेव परमेश्वरी ॥६७

यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा[2] ॥६८

यया त्वया जगत्स्रष्टा जगत्पाताऽत्ति[3] यो जगत् ॥
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥६९

पा० × यसमा बढी छ । १ महेश्वरी २ मया ३ जगत्पात्यति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

विष्णुः शरीरग्रहणमहमीशान एव च ॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥७०
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥७१
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥७२

ऋषिरुवाच ॥

एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥७३
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥७४
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ॥७५
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥
क्रोधरक्तेक्षणावत्तुं[1] ब्रह्माणं जनितोद्यमौ ॥७६
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ॥७७
× युद्ध्यमानावतिबलौ दृष्ट्वा तावसुरोत्तमौ ॥
× निजविद्यां समालोक्य समुद्भूतमहोत्सवौ ॥७८

पा० १ क्षणौहन्तुं × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× उवाचत्रियतांमत्तोवरो यांयोभिवाञ्छितः ॥
× विहस्य तद्विभोर्वाक्यमवलोक्य परस्परम् ॥७९
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥
उक्तवन्तौ वरोऽस्मत्तो ब्रियतामिति केशवम् ॥८०

श्री भगवानुवाच ॥
भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥
किमन्येन वरेणात्र एतावद्धि वृतं मया[1] ॥८१

ऋषिरुवाच ॥
वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ॥
त्रिलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥८२
× प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ॥
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥८३

ऋषिरुवाच ॥
तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ॥
कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ॥८४
× हत्वा तु भगवान्विष्णुस्ताबुभौ मधुकैटभौ ॥
× व्यनाशयद्भयं घोरं ब्रह्मणोव्यक्तजन्मनः ॥८५

पा० १ मम × यसभा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥८



इति श्री मार्कण्डेयपुराणे सावर्णिके मन्वन्त
देवीमहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः ॥१

उवाच १३ श्लोक ८६ जम्मा ८६

अरूमा भन्दा यस अध्यायमा १६ हरफ ८ श्लोक
बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

द्वितीयोऽध्याय

विनियोगः

अस्य श्रीमध्यमचरित्रस्य विष्णुर्ऋषिर्महालक्ष्मीर्देवता उष्णिक् छन्दः शाकंभरी शक्तिः दुर्गा बीजं वायुस्तत्वं आत्मनः सकल-कामनासिध्यर्थं महालक्ष्मीप्रीत्यर्थं जपे विनियोगः ॥

नमश्चण्डिकायै

ऋषिरुवाच ॥

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥
महिषेऽसुराणामधिपे देवानां च पुरन्दरे ॥१
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥
जित्वा तु[1] सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥२

पा० १ च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥३
यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ॥
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥४
सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ॥
अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठति ॥५
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥
विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥६
एतद्वः कथितं सर्वममरारिविचेष्टितम् ॥
शरणं च[1] प्रपन्नास्मो वधस्तस्य विचिन्त्यताम् ॥७
इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥८
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥९
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥
निश्चक्राम[2] महत्तेजस्तच्चैक्यं समगच्छत ॥१०
अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ॥
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥११

पा० १ वः । २ निर्गतं सु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

CC-0.In Public Domain. Digitization by eGangotri

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥१२

यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ॥
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥१३

सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् ॥
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥१४

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ॥
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ॥१५

तस्यास्तु दन्ताः सम्भूताः प्रजापतेर्न तेजसा ॥
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥१६

भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च ॥
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥१७

ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ॥
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥१८

ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च[1] ॥
शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ॥१९

चक्रं च दत्तवान् कृष्णः समुत्पाट्य[2] स्वचक्रतः ॥
शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ॥२०

पा० १ ऊचुर्जयजयेत्युच्चैर्जघ्नन्ती तेः जयैषिणः । २ द्यं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥
वज्रमिन्द्रः समुमाट्य[1] कुलिशादमराधिपः ॥२१

ददौ तस्यौ सहस्राक्षो घण्टामैरावताद् गजात् ॥
कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ॥२२

प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥
समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ॥२३

कालश्च दत्तवान् खड्गं तस्यौचर्म[2] च निर्मलम् ॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥२४

चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥
अर्धचन्द्र तथा शुभ्रं केयूरान् सर्वबाहुषु ॥२५

नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥
अङ्गुलीयकरत्नानि समस्तास्वंगुलीषु च ॥२६

विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ॥२७

अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ॥
अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ॥२८

हिमवान् वाहनं सिंह रत्नानि विविधानि च ॥
ददावशून्यं सुरया पानपात्रं धनाधिपः ॥२९

पा० १ द्यं । २ तस्याश्चर्म ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शेषश्च सकलनागेशो महामणिविभूषितम् ॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥३०
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥३१
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥
अमायतातिमहता प्रतिशब्दो महानभूत् ॥३२
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥
चचाल वसुधा चेलुः सकलाश्च महीधराः ॥३३
जेयेति च मुदा देवास्तामूचु[1] सिंहवाहिनीम्[2] ॥
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥३४
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥
संनद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥३५
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥३६
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ॥३७
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥
दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम् ॥३८

पा० १ देवाश्च मुदा तामूचुः । २ वाहनान् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ॥३९
महिषासुरसेनानीश्चिक्षुरख्यो[1] महासुरः ॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥४०
रथनामयुतैः षड्भिरुदग्राख्यो महासुरः ॥
अयुध्यतायुतानां च सहस्रेण महाहनुः ॥४१
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥४२
गजवाजिसहस्रौघैरनेकैः परिवारितः ॥
× उग्रास्यउग्रवीर्यश्च त्रिनेत्रश्च महाबलः ॥४३
× करालश्च तथा ताम्रो ह्यन्धकारो महासुरः ॥
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥४४
× वृतः कालो रथानां च रणे पञ्चशतायुतैः ॥
× युयुधे संयुगे तत्र रथानां परिवारितः ॥४५
बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ॥
× युयुधे संयुगे तत्र रथानां परिवारितः[3] ॥४६
अन्ये च तत्रायुतशो रथनागहयैर्वृता ॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ॥४७

पा० १ सेनानीश्चिक्षुराख्यो। २ परिवारित
३ युयुधे संयुगे तत्र तावद्भि परिवारितः। ×यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥४८

तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥४९

केचिच्च चिक्षिपुः शक्तिः केचित्पाशांस्तथापरे ॥
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥५०

सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥५१

अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥५२

सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेशरी ॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ॥५३

निःश्वासान् मुमचे यांश्च युध्यमाना रणेऽम्बिका ॥
त एव सद्यः सम्भूता गणाः शतसहस्रशः ॥५४

युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥
नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ॥५५

अवादयन्तः पटहान् गणाः शङ्खांस्तथापरे ॥
मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ॥५६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः[1] ॥
खड्गादिभिश्च शतशो निजघान महासुरान् ॥५७
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥
असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥५८
केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥
विपोथिता निपातेन गदया भुवि शेरते ॥५९
वेमुश्च केचिन्द्रुधिरं मुसलेन भृशं हताः ॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥६०
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥
श्येनानुकारिणः[2] प्राणान् मुमुचुस्त्रिदशार्दनाः ॥६१
केषांचिद् बाहवश्छिन्नश्छिन्नग्रीवास्तथापरे ॥
शिरांसि पेतुरन्येषामन्य मध्ये विदारिताः ॥६२
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥
एकबाहूक्षिचरणाः केचिद्देव्या द्विधा कृताः ॥६३
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिता ॥
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ॥६४
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥
कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥६५

पा० १ शरवृष्टिभिः २ सेनानु । शल्यानु । शैल्यानु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः[१] ॥
× तिष्ठ तिष्ठेति चैवोक्ता देव्या युयुधिरे मृधे ॥६६
पातितैः रथनागाश्चैरसुरैश्च वसुन्धरा ॥
अगम्या साभवत्तत्र यत्राभुत्स महारणः ॥६७
शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः ॥
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥६८
क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥६९
स च सिंहो महानादमुत्सृजन्धुतकेशरः ॥
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥७०
देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः ॥
यथैषां[२] तुष्टुवुर्देवाः[३] पुष्पवृष्टिमुचो दिवि ॥७१

★

इति श्री मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी-महात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्याय ॥ २ ॥

उवाच १ श्लोक ७१ जम्मा श्लोक १५७
अरूमा भन्दा यस अध्यायमा ६ हरफ ३ श्लोक बढी छ।

पा० १ रुधिरौघविलुप्ताङ्गाः संग्रामे लोमहर्षणैः। २ यथैनां ३ तुतुषुर्देवाः। × यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

तृतीयोऽध्याय

नमश्चण्डिकायै

ऋषिरुवाच

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥१
स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥२
तस्यच्छित्त्वा ततो देवो लीलयैव शरोत्करान् ॥
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ॥३
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥
विव्याध चैव गात्रेषु च्छिन्नधन्वानमाशुगैः ॥४
सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥५

CC-0. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥६
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ॥
ततो जग्राह शूलं स कोपादरुणलोचनः ॥७
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥८
दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ॥
तच्छूलं शतधा तेन नीतं[1] स च महासुरः ॥९
× तेन शूलेन निर्भिन्नो निपपात महीतले ॥
हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥१०
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥
सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ॥११
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥१२
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥
× शूलं च विफलं दृष्ट्वा धनुरादाय दानवः ॥१३
× देवीं सवाहनां बाणैः साच्छिनत्कृतलाघवः ॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ॥१४

पा० १ तेन तच्छतधा नीतं । × यस्मा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥
युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥१५
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥
ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ॥१६
करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥
उदग्रश्च रणे देव्याः शिलावृक्षादिभिर्हतैः ॥१७
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥
देवी क्रुद्धा गदापातै श्चूर्णयामास चोद्धतम् ॥१८
वाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥
उग्रास्यमुग्रवीर्यञ्च तथैव च महाहनुम् ॥१९
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥
बिडालस्यासिना कायात्पातयामास वै शिरः ॥२०
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥
× कालं च कालदण्डेन कालरात्रिरपातयत्[1] ॥२१
× असिनैवासिलोमानमच्छिदत्सा रणोत्सवैः[2] ॥
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥२२
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥
कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ॥२३

पा० १ उग्रदर्शनमत्युग्रैः खड्गपातैरताडयत् । २ गणैः सिंहेन देव्या च जयच्छ्वेडाकृतोत्सवैः । × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

लाङ्गूलताडितांश्चान्यान्छृङ्गाभ्यां च विदारितान् ॥
× रसना विभ्रमेणान्यानुरसान्यानताडयत् ॥२४
वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥
निःश्वासपवनेनान्यान् पातयामास भूतले ॥२५
निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥२६
सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहितलः ॥
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥२७
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥२८
धुतशृङ्गविभिन्नाश्च खण्डखण्डं[1] ययुर्घनाः ॥
श्वासनिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥२९
इति क्रोधसमाध्मातमापतन्तं महासुरम् ॥
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥३०
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ॥
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥३१
ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ॥
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥३२

पा० १ खण्डं खण्डं । × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥
तं खड्गचर्मणा सार्द्धं ततः सोऽभून्महागजः ॥३३
करेण च महासिंहं तं चकर्ष जगर्ज च ॥
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥३४
ततो महासुरो भूयो माहिषं वपुरास्थितः ॥
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥३५
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥३६
ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ॥
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥३७
सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ॥
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥३८

श्री देव्युवाच ॥

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ॥
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥३९

ऋषिरुवाच ॥

एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम् ॥
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥४०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः सोऽपि पदाऽऽक्रान्तस्तया निजमुखात्ततः ॥
अर्धनिष्क्रान्त एवासीद्[1] देव्या वीर्येण संवृत ॥४१
अर्ध निष्क्रान्त एवासौ युध्यमानो महासुरः ॥
तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥४२
× विलिषन्नेव शृंगाभ्यां देव्याश्च रणपंकजे ॥
× निश्चक्राम महावीर्यः खड्ग चर्म धरोसुरः ॥४३
× एवं स महिषो नाम ससैन्यः समुहृद्गणः ॥
× त्रैलोक्यं मोहयित्वा तु तया देव्या विनाशितः ॥४४
× त्रैलोक्यस्थैस्तदा भूतैर्महिषे विनिपातिते ॥
× जयेत्युक्तं ततः सर्वैः सदेवासुरमानवैः ॥४५
ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥४६
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥
जगुर्गन्धर्वपतयो ननृतुश्चापसरोगणाः ॥४७

★

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी-महात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥

उवाच ७ श्लोक ४७ जम्मा २०४

अरूमा मन्दा यसमा १२ हरफ ६ श्लोक बढ़ी छ ।

पा० १ एवाति । × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

चतुर्थोऽध्याय

नमश्चण्डिकायै

ऋषिरुवाच

शक्रादयः सुरगणा निहतेऽतिवीर्ये,[1]
तस्मिन्दुरात्मनिसुरारिबले च देव्या ॥
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा,
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥१

देवाऊचुः ॥

देव्या यया ततमिदं जगदात्मशक्त्या,
निश्शेषदेवगणशक्तिसमूहमूर्त्या ॥
तामम्बिकामखिलदेवमहर्षिपूज्यां,
भक्त्या नताः स्म विदधातु शुभानि साः नः ॥२

पा० १ ततः सुरगणाः सर्वे देव्या इन्द्रपुरोगमाः ॥
स्तुतिमारेभिरेकर्तुं निहते महिषासुरे ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यस्याः प्रभावमतुलं भगवाननन्तो,
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ॥

सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥३

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥

श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥४

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ॥

किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥५

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ॥
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥६

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥

CC-0. Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥७

या मुक्तिहेतुरविचिन्त्यमहाव्रता च[1]
अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि॥८

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ॥
देवी त्रयी भगवती भवभावनाय
वार्त्ता च सर्वजगतां परमार्तिहन्त्री ॥९

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ॥
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥१०

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ॥
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥११

पा० १ त्व-मभ्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ॥
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१२

देवि प्रसदि परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ॥
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥१३

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ॥
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१५

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥१६

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ॥
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१७

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेषु साध्वी[1] ॥१८

खड्ग प्रभानिकर विस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ॥
यन्नागता विलयमंशुमदिन्दुखण्ड
योग्याननं तव विलोक्यतां तदेतत् ॥१९

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ॥
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२०

पा० १ तेऽति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ॥
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२१

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ॥
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥२२

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२३
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२४
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥२५
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥२६

ऋषिरुवाच ॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ॥
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥२७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता[1] ॥
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥२८

श्री देव्युवाच ॥

× तुष्टोस्मि स्तोत्रमुख्येन तथैवाराधनेन च ॥
× सुरामांसोपहारेण भक्त्या प्रणतिपूर्वया ॥२९

त्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ॥
× ददाम्यहमतिप्रीत्यास्तवैरेभि सुपूजिता ॥३०

× महिषोयं महावीर्यो निकृतश्चरणे मया ॥
× जगतामुपकाराय किमन्यदवशिष्यते ॥३१

× कर्तव्यमपरं यच्च दुष्करन्तन्निवेद्यताम्[2] ॥
× करिष्यामि न संदेहो भूयोपि रिपुनाशनम् ॥३२

श्रीदेवा ऊचुः ॥

भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥
यदयं निहतः शत्रुरस्माकं महिषासुरः ॥३३

पा० १ पैःस्तु धूपिता ।
२ कर्तव्यमपरं यच्च दुष्करं तत्र विद्महे ॥
इत्याकर्ण्य वचो देव्या प्रत्यचुस्ते दिवौकसः ॥
× यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥३४

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥
× शुचिरेकमनाः शान्तो भक्त्या त्रिभुवनेश्वरीम् ॥३५

तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ॥
× ऐश्वर्यं विपुलं यच्च मनस्याह्लादकारणम् ॥३६

वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥
× पूर्वमेव वरंदद्याश्चास्माकं वचनात्ततः ॥३७

× नरस्य विपदं चान्यां विनाशय तथापदम् ॥

ऋषिरुवाच ॥

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽऽत्मनः ॥३८

तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥
इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ॥३९

देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥
पुनश्च गौरीदेहात्सा[1] समुद्भूता यथाभवत् ॥४०

पा० १ गौरीदेहा सा । गौरी देहा सा ।

× यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥
रक्षणाय च लोकानां देवानामुपकारिणी[1] ॥४१

❋

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी महात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥ ४ ॥

उवाच ६ श्लोक ४१ जम्मा २४५

अरूमा भन्दा यसमा १२ हरफ ६ श्लोक बढी छ।

पा० १ तच्छृणुष्व मयाऽऽख्यातं यथावत्कथयामि ते ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

पञ्चमोऽध्यायः

विनियोगः

अस्य श्री उत्तरचरित्रस्य रुद्रऋषिः, महासरस्वती देवता, अनुष्टुप् छन्दः, श्री भीमा शक्तिः, श्री भ्रामरी बीजम् सूर्यस्तत्त्वम् सर्वकामार्थे जपे विनियोगः ।

नमश्चण्डिकायै

ऋषिरुवाच ॥

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ॥
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥१
तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ॥
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च[1] ॥
× ततो देवा विनिर्धूता विना युद्धेन भूपते ॥३

× इन्द्रस्य त्याजितः स्वर्गो भ्रष्टराज्याः पराजिताः ॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृतः[2] ॥४

× तेषु तेष्वथ घृष्टेषु लोकेषु च महीतले ॥
× स्वानेव प्रथितान्दैत्यान् तत्र तत्र न्ययोजयत् ॥५

× ततो देवाः सहेन्द्रेण विध्राणाः मानुषीं तनुम् ॥
विचेरूरवनौ राजन् कृशा धमनिसंतत ॥६

× एवं भूतसतां तत्रदेवानाममितद्युते ॥
× गतमासीन्महाराज चत्वारिंशच्चतुर्युगम् ॥७

× ततो देवाः सहेन्द्रेण ब्रह्मणा च समेत्य वै ॥
× दुर्गां भगवतीं भद्रां संस्मरंत्यपराजिताम् ॥८

तयास्माकंवरो दत्तो यथाऽऽपत्सु स्मृताखिलाः ॥
× यया सा परया शक्त्या जगच्चैतन्यरूपया ॥९

भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥
× सा चण्डी चण्डमारी सा स्मरणाद्दुर्गहन्त्रिणी ॥१०

पा० १ अन्यषां चाधिकारान् स स्वयमेवाधितिष्ठति ॥
२ महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥
× यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ॥
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥११

देवा ऊचुः ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणता स्म ताम् ॥१२

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥
ज्योत्स्नायै चन्द्ररूपिण्यै सुखायै सततं नमः ॥१३

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्मो नमो नमः॥
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥१४

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१५

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥१६

या देवी सर्वभूतेषु विष्णुमायेति शाब्दिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

या देवी सर्वभूतेषु निन्द्रारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१

या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४

× या देवी सर्वभूतेषु मोहरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५

× या देवी सर्वभूतेषु श्रुतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२७

× या देवी सर्वभूतेषु क्षमारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८

× पा० यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× या देवी सर्वभूतेषु सत्यरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२९

× या देवी सर्वभूतेषु ऋद्धिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३०

× या देवी सर्वभूतेषु सिद्धिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३१

× या देवी सर्वभूतेषु तृप्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३२

× या देवी सर्वभूतेषु क्रोधरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३३

× या देवी सर्वभूतेषु मतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३४

× या देवी सर्वभूतेषु गतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३५

× या देवी सर्वभूतेषु रतिरूपेण संस्थिता ॥
नस्मतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३६

× या देवी सर्वभूतेषु धृतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३७

× पा० यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३८

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३९

× या देवी सर्वभूतेषु ज्ञातिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४०

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४१

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४२

× या देवी सर्वभूतेषु मेधारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४३

× या देवी सर्वभूतेषु प्रज्ञारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४४

× या देवी सर्वभूतेषु कीर्तिरूपेण संस्थिता ॥
नस्मतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४५

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४६

× पा० यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४७

× या देवी सर्वभूतेषु सन्ध्यारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४८

× या देवी सर्वभूतेषु दिवारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४९

× या देवी सर्वभूतेषु रात्रिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५०

× या देवी सर्वभूतेषु भीतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५१

× या देवी सर्वभूतेषु रजोरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५२

× या देवी सर्वभूतेषु सत्वरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५३

× या देवी सर्वभूतेषु तमोरूपेण संस्थिता ॥
नस्मतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५४

× या देवी सर्वभूतेषु सृष्टिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५५

पा० × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× या देवी सर्वभूतेषु स्थितिरूपेण संस्थिता ॥
नमतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५६

× या देवी सर्वभूतेषु लयरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५७

× या देवी सर्वभूतेषु नीतिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५८

या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५९

× या देवी सर्वभूतेषु मायारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६०

× या देवी सर्वभूतेषु स्वधारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६१

× या देवी सर्वभूतेषु स्वाहारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६२

या देवी सर्वभूतेषु इच्छारूपेण संस्थिता ॥
नस्मतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६३

× या देवी सर्वभूतेषु ज्ञानरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६४

पा० × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× या देवी सर्वभूतेषु क्रियारूपेण संस्थिता ॥
नमतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६५

× या देवी सर्वभूतेषु विद्यारूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६६

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६७

× या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६८

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६९

× या देवी सर्वभूतेषु पितृरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७०

× या देवी सर्वभूतेषु भातृरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७१

× या देवी सर्वभूतेषु प्रजारूपेण संस्थिता ॥
नस्मतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७२

× या देवी सर्वभूतेषु पृथ्वीरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७३

पा० × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× या देवी सर्वभूतेषु जलरूपेण संस्थिता ॥
नमतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७४

× या देवी सर्वभूतेषु तेजोरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७५

× या देवी सर्वभूतेषु वायुरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७६

× या देवी सर्वभूतेषु नभोरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७७

× या देवी सर्वभूतेषु शब्दरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७८

× या देवी सर्वभूतेषु स्पर्शरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७९

× या देवी सर्वभूतेषु रूपरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८०

× या देवी सर्वभूतेषु रसरूपेण संस्थिता ॥
नस्मतस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८१

× या देवी सर्वभूतेषु गन्धरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८२

पा० × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८३

× या देवी सर्वभूतेषु सर्वरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८४

× या देवी सर्वभूतेषु मुक्तिरूपेण संस्थिता ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८५

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥८६

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८७

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ॥
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥८८

या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥८९

पा० × यस्मा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ।।

एवं स्तवादियुक्तानां देवानां तत्र पार्वती ।।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ।।९०

साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।।
शरीरकोशतश्चास्याः समुद्भताब्रवीच्छिवा ।।९१

स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ।।
देवैः समस्तैः[1] समरे निशुम्भेन पराजितैः ।।९२

× इत्याकर्ण्य गिरं गौरी तामाहसुभगां पुनः ।।
× हिमवद्दक्षिणं शृङ्गं गत्वा त्वं भारतान्तिकम् ।।९३
× देवकार्यं विधायाशु पश्चादेहि ममांतिकम् ।।
× आज्ञप्ता च ततो देवी दैवैः सह विनिर्ययौ ।।९४
× शुम्भदीनसुरान् हत्वा प्रीतिं दास्यामि च सुराः ।।
शरीर कोशाद्यत्तस्याः[2] पार्वत्या निःसृताम्बिका ।।९५

कौशिकीति[3] समस्तेषु ततो लोकेषु गीयते ।।
तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ।।९६

कालिकेति समाख्याता हिमालचलकृताश्रया ।।
× अथ स्नात्वा ययौ देवी समत्तं सा दिवौकसाम् ।।९७

पा० १ समेतै २ कोषाद्यतस्था ३ कौषिकीति ।
× यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× नियोज्य कौशिकीं स्वांगात्सम्भूतां तत्प्रियाय वै ॥
ततो अम्बिकां परं रूतं बिभ्रणांतीं[1] सुमनोहरम् ॥९८

× हन्तास्मि तौ महावीर्यावित्युक्त्वा त्रिदशांस्तथा ॥
× प्रतस्थे हिमवच्छृङ्गं सिद्धचारणसेवितम् ॥९९

× गन्धर्वयक्षचरितमप्सरोगणसेवितम् ॥
× प्रालेये शीतलतटं पितुरङ्कमनुत्तमम् ॥१००

× यत्र पूर्वं तपस्तप्तं पुरा परमदारुणम् ॥
× मुनिभिर्देवसंघैश्च ब्रह्मणा च तथात्मना ॥१०१

× तत्र गत्वा महादेवी बिभ्राणा परमं वपुः ॥
× डोलक्रीडापरा भूत्वा जगौ गेयमनुत्तमम् ॥१०२

× तदा स्वादनुकंपा सा भूयो रेमे स्वलंकृता ॥
× अन्तर्हिताश्च मुनयः सिद्धाश्च परमर्षयः ॥१०३

× तुष्टुवुर्देवसंघाश्च तत्रस्थाममितप्रभाम् ॥
× तदा देवा महाभागा जग्मुस्ते हृष्टमानसः ॥१०४

× तस्मिन् गिरिवरे राजन् डोलामारुह्य काञ्चनी ॥
× नृत्यन्ती च हसन्ती च गायन्ती च मुहुर्मुहुः ॥१०५

× उवाच स चिरंकालं देवानां हितकाम्यया ॥
× अथाम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ॥१०६

पा० × यसमा बढी छ । १ बिभ्राणां ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥
ताभ्यां शुम्भाय चाख्याता सातीव[1] सुमनोहरा ॥१०७
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥
नैव तादृक् क्वचिद्भूतं दृष्टं केनचिदुत्तमम् ॥१०८
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥
× या दृष्टपूर्वा देवेषु गन्धर्वेषु नगेषु च ॥१०९
स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ॥
× नैव देवी न गन्धर्वी नासुरी न च पन्नगा ॥११०
× दृष्टपूर्वा क्वचिन्नारी श्रुतपूर्वापि वा प्रभो ॥
× त्रैलोक्ये याः सुचार्वंग्यो हावभावसमन्विताः ॥१११
× आदाय तिलशस्तासां निर्मिता स्त्री तिलोत्तमा ॥
× तिलोत्तमा सहस्राणां तिलांशैनैव निर्मिता ॥११२
× भ्राजते पर्वतस्याग्रे डोलामारुह्य कांचनीम् ॥
× उनषोडशवर्षे च सम्पूर्णनवयौवना ॥११३
× चतुर्दशानां लोकानां देवतेव विराजते ॥
× नैव तस्याः पिता माता न भ्राता न च बान्धवा ॥११४
× न चान्ये रक्षितारश्च सैका तिष्ठति निर्जने ॥
× सा रूपसम्पदोपेता यौवनोत्तमशालिनी ॥११५

पा० १ अतीव × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सा तु तिष्ठति दैत्येन्द्र तां भवान् प्रष्टुमर्हति ॥
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥११६
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥११७
पारिजाततरूश्चायं तथैवोच्चैःश्रवा हयः ॥
विमान हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ॥११८
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥
निधिरेष महापद्मः समानीतो धनेश्वरात् ॥११९
किञ्जल्किनीं ददौ चाब्धिर्माला मम्लानपङ्कजाम् ॥
छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ॥ १२०
तथायं स्यन्दनवरो यः पुराऽऽसीत्प्रजापतेः ॥
मृत्योरूत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ॥१२१
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥
निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ १२२
वह्निरपि[1] ददौ तुभ्यमग्निशौचे च वाससी ॥
एवं दैत्यन्द्र रत्नानि समस्तान्याहृतानि ते ॥ १२३
× स्त्रीरत्नमेषा कल्याणी स्वयमेवाभ्युपागता ॥
× त्रैलोक्य राज्यादधिका त्वया कस्मान्न गृह्यते ॥१२४

पा० १ वन्हिश्चापि × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ॥

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ॥
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम्[1] ॥१२५
इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ॥१२६

ऋषिरुवाच ॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥
तां[2] च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ १२७

दूत उवाच ॥

देवि दैत्येश्वरः शम्भुस्त्रैलोक्ये परमेश्वरः ॥
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ १२८
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ १२९
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक ॥ १३०
त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥
तथैव गजरत्नं[3] च हृतं[4] देवेन्द्रवाहनम् ॥१३१

पा० १ शुम्भउवाच २ सा ३ गजरत्नानि ४ हृत्वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥
उच्चैःश्रवससंज्ञं तु प्रणिपत्य[1] समर्पितम् ॥१३२
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ॥
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥१३३
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥१३४
मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ॥
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥१३५
परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥
एतद् बुद्ध्या समालोक्य[2] मत्परिग्रहतां व्रज ॥१३६

ऋषिरुवाच ॥

इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ ॥
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥१३७

देव्युवाच ॥

सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ॥
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥१३८
किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥१३९

पा० १ तत्प्रणिपत्य २ समालोच्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ॥
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥१४०

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ॥
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥१४१

दूत उवाच ॥

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥१४२

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका ॥१४३

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् ॥१४४

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ॥
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥१४५

देव्युवाच ॥

एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्यवान् ॥
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥१४६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स त्वं गच्छ भयोक्तं ते यदेतत्सर्वमादृतः ॥
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत् ॥१४७

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये दूतसम्वादो नाम पञ्चमोऽध्यायः ॥ ५ ॥

उवाच १०॥ श्लोक १४७ जम्मा ३९३

अरूमा भन्दा यसमा १४४ हरफ ७२ श्लोक बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

षष्ठोऽध्यायः

नमश्चण्डिकायै

ऋषिरुवाच ॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥१

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुराराट् ततः ॥
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥२

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥
तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् ॥३

तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ॥
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥५
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥६
न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥७

देव्युवाच ॥

दैत्यश्वरेण प्रहितो बलवान् बलसंवृतः ॥
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥८

ऋषिरुवाच ॥

इत्युक्तः सोऽत्यधावत्तामसुरो[1] धूम्रलोचनः ॥
हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥९
अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका[2] ॥
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥१०
ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥११

पा० १ सोऽभ्य २ तथाम्बिकाम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कांश्चित् करप्रहारेण दैत्यानास्येन चापरान् ॥
आक्रान्त्या[1] चाधरेणान्यान्[2] स जघान[3] महासुरान् ॥११

केषांचित्पाटयामास नखैः कोष्ठानि केशरी[4] ॥
तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥१३

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥१४

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥१५

श्रुत्वा तमस्सुरं देव्या निहतं धूम्रलोचनम् ॥
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥१६

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ॥
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥१७

हे चण्ड हे मुण्ड बलैर्बहुभि[5] परिवारितौ ॥
गच्छतां तत्र गत्वा[6] तु[7] सा समानीयतां लघु ॥१८

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ॥
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥१९

पा० १ आक्राम्य २ चरणेनान्यान् ३ संजघान, निजघान, जघानसुमहा ४ केसरी ५ लै ६ तत्रगच्छतां ७ च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥२०

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥
उवाच ४॥ श्लोक २० जम्मा ४१३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

सप्तमोऽध्यायः

नमश्चण्डिकायै

ऋषिरुवाच ॥

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ॥
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥१
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ॥
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥२
ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥३
ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ॥
कोपेन चास्या वदनं १मषिवर्णमभूत्तदा ॥४

पा० १ मषी।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥
काली करालवदना विनिष्क्रान्ता सिपाशिनी ॥५

विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥६

अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥७

सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥
सैन्ये तत्र सुरारीणामभक्षयत् तद्बलम् ॥८

पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ॥
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥९

तथैव योधं तुरगै रथं सारथिना सह ॥
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यति [1]भैरवम् ॥१०

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥११

तैर्मुक्तानि च शस्त्राणि तथास्त्राणि[2] महासुरैः[3]॥
मुखेन जग्राह रूषा दशनैर्मथितान्यपि ॥१२

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ॥
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥१३

पा० १ यत्यती २ महा ३ तथा।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

असिना निहताः केचित्केचित्खट्वाङ्गताडिताः१॥
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥१४
क्षणेन तन्महासैन्यमसुराणां२ निपातितम् ॥
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥१५
शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥१६
तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥१७
ततो जहासातिरुषा भीमं भैरवनादिनी ॥
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥१८
उत्थाय च महासिं हं देवी चण्डमधावत ॥
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥१९
×छिन्ने शिरसि दैतेन्द्रश्चक्रे नादं सुभैरवम् ॥
×तेन नादेन महता त्रासितं भुवनत्रयम् ॥२०
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ॥
तमप्यपातयद्भूमौ सा खट्वांगाभिहतं३ रुषा ॥२१
हतशेषं ततः सैन्य दृष्ट्वा चण्डं निपातितम् ॥
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥२२

पा० १ ता रणे २ तद् बलं सर्वं ३ खड्गाभिहतं।
× यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ॥
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥२३

देव्युवाच ॥

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ॥
युध्दयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥२४

ऋषिरुवाच ॥

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ॥
उवाच कालीं कल्याणी ललितं चण्डिका वचः॥२५

यस्माच्चण्डं च मुण्डं गृहीत्वा त्वमुपागता ॥
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥२६

❋

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥ ७ ॥

उवाच ३ श्लोक २६ जम्मा ४३९

अरूमा भन्दा यसमा २ हरफ १ श्लोक बढ़ी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

अष्टमोऽध्यायः

नमश्चण्डिकायै

ऋषिरूवाच ॥

चण्डे च निहते दैत्यमुण्डे च विनिपातिते ॥
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥१
ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥२
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥
कम्बूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥३
कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ॥
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालका दौहृदा मौर्याः कालकेयास्तथासुराः ॥
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥५
इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥६
× उत्पाता बहवस्तत्रप्रादुरासन्सहस्रशः ॥
× युगान्तमेघा ववृषुरस्थिशोणितकर्दमान् ॥७
× क्रव्यादा व्यजनं घोरं शिवाश्चापि ववाशिरे ॥
× तानुत्पाता ननादस्य प्रययौ साहिमाचलम् ॥८
आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥९
स च[1] सिंहो महानादमतीव कृतवान् नृप ॥
घण्टास्वनेन तान्नादानम्बिका[2] चोपबृंहयत् ॥१०
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥
निनादैर्भीषणैः काली जिग्ये विस्तरितानना ॥११
तं निनादमुपश्रुत्य दैत्यसैन्यश्चतुर्दिशम् ॥
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥१२
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ॥
भवायामरसिंहानामतिवीर्यबलान्विताः ॥१३

पा० १ ततः २ तन्नादेमम्बिका ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ब्रह्मशम्भुहविष्णूनां तथेन्द्रस्य च शक्तयः ॥
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१४

यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ॥
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥१५

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥१६

माहेश्वरी वृषारुढा त्रिशूलवरधारिणी ॥
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥१७

कौमारी शक्तिहस्ता च मयूरवरवाहना ॥
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥१८

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१९

यज्ञ वाराहमतुलं[1] रूपं या बिभ्रती[2] हरेः ॥
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥२०

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२१

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ॥
प्राप्ताः सहस्रनयना यथा शक्रस्तथैव सा ॥२२

पा० १ जज्ञे वाराह २ बिभ्रतो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम् ॥२३
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ॥
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥२४
सा चाह धूम्रजटिलमीशानमपराजिता ॥
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥२५
ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ॥
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥२६
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ॥
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥२७
बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ॥
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥२८
यतो नियुक्तो दैत्येन तथा देव्या शिवः स्वयम् ॥
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥२९
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥
अमर्षापूरिता जग्मुर्यत्र[1] कात्यायनी स्थिता ॥३०
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥३१

पा० १ जग्मुर्यतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ॥
चिच्छेद लीलयाऽऽघ्मातधनुर्मुक्तैर्महेषुभिः ॥३२
तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्वांगपोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥३३
कमण्डलुजलाक्षेपहतवीर्यान्[1] हतौजसः ॥
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥३४
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥
दैत्यान्जघान कौमारी तथा शक्त्यातिकोपना ॥३५
ऐन्द्री कुलिशपातेन शतशो दैत्यदानवाः ॥
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥३६
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥३७
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ॥
नारसिंही चचारा जौ नादापूरित दिङ्मुखा[2] ॥३८
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तथा[3] ॥३९
इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ॥
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥४०

पा० १ पहतवीयान् २ पूर्णदिगम्बरा ३ तदा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् ॥
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥४१
× भागिनेयो महावीर्यस्तयोः शुम्भनिशुम्भयोः ॥
× क्रोधवत्याः सुतो राजन्महाबल पराक्रम ॥४२
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ॥
समुत्पतति मेदिन्या[1]स्तत्प्रमाणैर्महासुरः ॥४३
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ॥
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥४४
कुलिशेनाहतस्याशु बहु[2] सुस्राव शोणितम् ॥
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४५
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ॥
तावन्त पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४६
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ॥
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥४७
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥४८
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥४९

पा० १ मेदिन्यां तत्प्रमाणस्तदासुरः २ तस्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ॥
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥५०
शक्त्या जघान कौमारी वाराही च तथासिना ॥
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥५१
× ताडयामास हृदयेन चचाल तथापि स ॥
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ॥५२
मातृ: कोपसमाविष्टो रक्तबीजो महासुरः ॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ॥५३
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ॥५४
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥
× ततो वभाषिरन्योन्यं दिवि देवा विमानगा ॥५५
× न चे दृशः संवभूव भविता वा महासुरः ॥
तान्विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरम्[1] ॥५६
उवाच कालीं चामुण्डे विस्तीर्ण[2] वदनं कुरु ॥
मच्छस्त्रपातसम्भूतान् रक्तबिजान्महासुरान्[3] ॥५७
रक्तबिन्दु[4] प्रतीच्छ त्वं वक्त्रेणानेन वेगिना[5] ॥
भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ॥५८

पा० १ सत्वरा २ विस्तर ३ रक्तबिन्दून् ४ रक्तबिन्दो ५ वेगिता
× यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥
भक्षमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ॥५९

ऋषिरुवाच ॥

इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥६०

ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥६१

तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ॥६२

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥६३

देवी शूलेन वज्रेण[1] बाणैरसिभिर्ऋष्टिभिः ॥
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥६४

स पपात महिपृष्ठे शस्त्रसङ्घसमाहतः[2] ॥
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥६५

ततस्ते हर्षमतुलमवापुस्त्रिदशा नृपः ॥
तेषां मातृगणो मत्तो[3] ननर्त्तासृङ्मदोद्धतः ॥६६

—:०:—

पा० १ चक्रेण २ शस्त्रसंहतितो हतः ३ जातो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ।। ८

उवाच २ श्लोक ६६ जम्मा ५०५

अरूमा भन्दा यसमा ६ हरफ ८ श्लोक बढ़ी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

नवमोऽध्यायः

नमश्चण्डिकायै

राजोवाच ॥

विचित्रमिदमाख्यातं भगवन् भवता मम ॥
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥१

भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपतः ॥२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ॥

चकार कोपमतुलं रक्तबीजे निपातिते ॥
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥३

हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥४

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥५

आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ॥
निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥६

ततो युद्धमतीवासीद् देव्या शुम्भनिशुम्भयोः ॥
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥७

चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः[1] ॥
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥८

निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ॥
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥९

ताडिते वाहने देवी सुरप्रेणासिमुत्तमम् ॥
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥१०

पा० १ शुशरोत्करै ।

CC-0. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ॥
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥११
कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ॥
आयान्तं[1] मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥१२
आदायाथ[2] गदां सोऽपि चिक्षेप चण्डिकां प्रति ॥
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥१३
ततः परशुहस्तं तमायान्तं दैत्यतुङ्गवम् ॥
आहत्य देवी बाणौघैरपातयत भूतले ॥१४
तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ॥
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥१५
स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥१६
तमायान्तं समालोक्य देवी शङ्खमवादयत् ॥
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥१७
पूरयामास कुकुभो निजघण्टास्वनेन च ॥
समस्तदैत्यसैन्यानां तेजोवधविधायिनी ॥१८
ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥
पूरयामास गगनं गां तथैव[3] दिशो दश ॥१९

पा० १ आयातं २ आविध्याथ, अथादाय ३ तथोपदिशो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहताः ॥२०

अट्टाट्टहासमशिवं शिवदूती चकार ह ॥
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥२१

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ॥
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥२२

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभिषणा ॥
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥२३

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ॥
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥२४

शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ॥
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥२५

ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ॥
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥२६

ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ॥
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥२७

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् २८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥२९
ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ॥
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥३०
तस्यापतत एवाशु गदां चिच्छेद चण्डिका ॥
खड्गेन शितधारेण स च शूलं समाददे ॥३१
शूलहस्तं समायान्तं निशुम्भममरार्दनम् ॥
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥३२
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ॥
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥३३
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥३४
ततः सिंहश्चखादोग्रं[1] दंष्ट्राक्षुण्णशिरोधरान् ॥
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥३५
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥३६
माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥३७

पा० १ दोगदङ्ग्रा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

खण्डंखण्डं[1] च चक्रेण वैष्णव्या दानवाः कृताः॥
× नारसिंह्यातथादैत्यानस्त्रैरूग्रैर्विदारिता ॥३८
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे॥
× अट्टहासैश्च हुंकारैः सिंहेन च निपातयत् ॥३९
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवे[2] ॥
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥४०

❋

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये निशुम्भवधो नामाष्टमोऽध्यायः ॥ ८

उवाच २ श्लोक ४० जम्मा ५४५

अरूमा भन्दा यसमा २ हरफ १ श्लोक बढ़ी छ।

पा० १ खण्डखण्डं २ महाहवात् × यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

दशमोऽध्यायः

नमश्चण्डिकायै

ऋषिरुवाच ॥

निशुम्भं निहितं दृष्ट्वा भ्रातरं प्राणसम्मितम् ॥
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥१
बलावलेपाद्[1] दुष्टे त्वं मा दुर्गे गर्वमावह ॥
अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ॥२

देव्युवाच ॥

एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥३

पा० १ पदु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ॥

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ॥
तस्या देव्यास्तनौ जग्मुरेकैवासोत्तदाम्बिका ॥४

देव्युवाच ॥

अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ॥
तत्संहृतं मयैकैव तिष्ठाम्याजौ[1] स्थिरो भव ॥५

ऋषिरुवाच ॥

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ॥
पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥६

शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥
तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ॥७

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥८

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥
बभञ्ज लीलयैवोग्रहुङ्कारो[2]च्चारणादिभिः ॥९

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥
सापि[3] तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥१०

पा० १ तिष्ठा २ लीलयैवोद्ग ३ सा च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥११

ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ॥
अभ्यधावत्तदा[1] देवीं दैत्यानामधिपेश्वरः ॥१२

तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ॥
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥१३

× अश्वांश्च पातयामास रथं सारथिना सह ॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥१४

जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥१५

तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ॥१६

देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥
तलप्रहाराभिहतो निपपात महीतले ॥१७

स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥१८

तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥१९

पा० १ वत तां हन्तु दैत्या × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चक्रतुः प्रथमं [1]युद्धं मुनिविस्मयकारकम् ॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ॥२०
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगवान्[2] ॥२१
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥
तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ॥२२
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षितः[3] ॥२३
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ॥२४
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥२५
सरितो मार्गवाहिन्यस्तथा शुम्भे निपातिते[4] ॥
ततो देवगणा सर्वे हर्षनिर्भरमानसाः ॥२६
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥२७
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥
जज्वलुश्चाग्नयःशान्ताः शान्ता दिग्जनितस्वनाः ॥२८

—:o:—

पा० १ सिद्ध २ वेगितः ३ विक्षतः ४ सस्तत्र ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥ १० ॥

उवाच ५ श्लोक २८ जम्मा ५७२

अरूमा भन्दा यसमा १ हरफ ॥ श्लोक बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

एकादशोऽध्यायः

नमश्चण्डिकायै

ऋषिरुवाच ।।

देव्या हते तत्र महासुरेन्द्रे,
सेन्द्राः सुरा वह्निपुरोगमास्ताम् ॥
कात्यायनीं तुष्टुवुरिष्टलाभाद्[1]
विकाशिवक्त्राब्ज[2]विकाशिताशाः ॥१

देवा ऊचुः ।।

देवि प्रपन्नार्तिहरे प्रसीद,
प्रसीद मातर्जगतोऽखिलस्य ॥

पा० १ लम्भाद् २ वक्त्रस्तु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥२

आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ॥
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥३

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ॥
सम्मोहितं देवि समस्तमेतत्-
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ॥
त्वयैकया पूरितमम्ब सर्वं[1]
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥५

सर्वभूता यदा देवी स्वर्गमुक्ति[2] प्रदायिनी ॥
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥६

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥७

पा० १ मम्बयैतत् २ भुक्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कलाकाष्ठादिरूपेण परिणामप्रदायिनी ॥
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥८

सर्वमङ्गलमाङ्गल्ये[1] शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥९

सृष्टिस्थितिविनाशानां हेतु[2] भूते सनातनि ॥
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥१०

शरणागतदीनार्तपरित्राणपरायणे ॥
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११

× दशवक्त्रे दशभुजे त्रिशल्लोचनराजिते ॥
× महाकालीतिविख्याते नारायणि नमोऽस्तु ते ॥१२

× पद्मालये पद्महस्ते अष्टैश्वर्यप्रसेविते ॥
× महालक्ष्मीतिविख्याते नारायणि नमोऽस्तु ते ॥१३

× वेदाऽऽगमादिरूपेण वाग्विलासाऽक्षरात्मिके ॥
× महासरस्वती देवि नारायणि नमोऽस्तु ते ॥१४

× मधुकैटभनाशार्थं कल्पान्तावसने तदा ॥
× ब्रह्मस्तुतिस्तुते देवि नारायणि नमोऽस्तु ते ॥१५

× सर्वदेवमये रूद्रे अष्टादशभुजेऽपरे ॥
× सैन्यहन्त्रीतिविख्याते नारायणि नमोऽस्तु ते ॥१६

पा० १ मङ्ल्ये २ शक्ति। × यसमा बढी छ।

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× महिषासुरनाशार्थं सिंहस्कन्धोपरिस्थिते ॥
× वीरशक्तिरितिख्याते नारायणि नमोऽस्तु ते ॥१७
× हुंकारवीक्षणेनैव हतधूम्राक्षसैनिके ॥
× हिमाचलस्य शृङ्गे स्मिन्नारायणि नमोऽस्तु ते ॥१८
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥
अक्षसूत्रधरे[1] देवि नारायणि नमोऽस्तु ते ॥१९
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥
माहेश्वरिस्वरूपेण नारायणि नमोऽस्तु ते ॥२०
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥२१
शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥२२
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ॥
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥२३
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ॥
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥२४
किरीटिनि महावज्रे[2] सहस्रनयनोज्ज्वले ॥
वृत्रत्राणहरे[3] चैन्द्रि नारायणि नमोऽस्तु ते ॥२५

पा० १ कौशाम्भ चरिके २ वज्रे ३ वृत्रप्राण हरे।
× यसमा बढी छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शिवदूती स्वरूपेण हतदैत्यमहाबले ॥
घोररूपे महारात्रे नारायणि नमोऽस्तु ते ॥२६

दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥२७

× उमे दुर्गे भगे भद्रे रूद्ररौद्रे कपर्द्दिनि ॥
× कालरात्रि धृते गौरि नारायणि नमोऽस्तु ते ॥२८

× श्रीमाये कालिके चेति चन्द्रिकायै नमोऽस्तु ते ॥
× नवार्णवेतिविख्याते नारायणि नमोऽस्तु ते ॥२९

× दुर्गे निवेदवाक्यैस्त्वं षड्बीजैः संपुटीकृते ॥
× द्वादशार्णोतिविख्याते नारायणि नमोऽस्तु ते ॥३०

× सायुधैर्बहुभिर्द्देवि दोर्दण्डैरविराजिते ॥
× शक्तिदुर्गेतिविख्याते नारायणि नमोऽस्तु ते ॥३१

× सर्वभूत-शरिरेषु वहिरन्तर्व्यवस्थिते ॥
× सर्वव्यापिनि सर्वज्ञे नारायणि नमोऽस्तु ते ॥३२

लक्ष्मी लज्जे महाविद्ये श्रद्धे पुष्टे[1]स्वधे ध्रुवे ॥
महारात्रे[2] महामाये[3] नारायणि नमोऽस्तु ते ॥३३

मधे सरस्वति वरे भूति वाभ्रवि तामसि ॥
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥३४

पा० १ पुष्टि २ रात्रि ३ महाविद्ये × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× रक्तबिज विनाशार्थं विस्तीर्णवदनाम्बुजे ॥
× चण्डिकाशक्तिरत्युग्रे नारायणि नमोऽस्तु ते ॥३५

× मातृसैन्यावृतेगौरी दक्षिणेकालिके परे ॥
× निशुम्भदर्पदमने नारायणि नमोऽस्तु ते ॥३६

× ब्रह्मादि मूर्ति संकाशे सायुधाष्ट भुजेपरे ॥
× दैत्यराजान्तकेदेवि नारायणि नमोऽस्तु ते ॥३७

सर्वतःपाणिपादान्ते सर्वतोऽक्षिशिरोमुखि[1] ॥
सर्वतःश्रवणघ्राणे नारायणि नमोऽस्तु ते ॥३८

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि नारायणि नमोऽस्तु ते[2] ॥३९

× सर्वदेवादि देवस्य सर्वस्याभित ते जसः ॥
× सर्व प्राण हराध्यक्षे नारायणि नमोऽस्तु ते ॥४०

× सर्वेषामेव भूतानां भुक्तिमुक्ति प्रदायनि ॥
× सर्वदुःखहरे देवि नारायणि नमोऽस्तु ते ॥४१

× शक्त्याकल्पितसर्वाङ्गे सर्वाविद्या विनाशिनि ॥
× सर्वविद्याधिपे देवि नारायणि नमोऽस्तु ते ॥४२

× सर्वभूतप्रशमनि सर्वोपद्रव नाशिनि ॥
× सर्वकामप्रदे देवि नारायणि नमोऽस्तु ते ॥४३

पा० १ मुखे २ दुर्गे देवि नमोऽस्तु ते × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥४४

ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥४५

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥४६

असुरासृग्वसापङ्कचर्चितस्ते कराज्वले[1] ॥
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥४७

रोगानशेषानपहंसि तुष्टा
रुष्टा तु[2] कामान् सकलानभीष्टान् ॥
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥४८

एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम् ॥
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं
कृत्वाम्बिकेतत्प्रकरोति कान्या ॥४९

विद्यासु शास्त्रेषु विवेकदीपे,
ष्वाद्येषु वाक्येषु च का त्वदन्या ॥

पा० १ करोज्वलः २ ददासि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् ॥५०
रक्षांसि यत्रोग्रविषाश्च नागा,-
यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ॥५१
विश्वेश्वरि त्वं परिपासि विश्वम्
विश्वात्मिका धारयसीति विश्वम् ॥
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥५२
देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथासुरवधादधुनैव सद्यः ॥
पापानि सर्वजगतां प्रशमं[1] नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥५३
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥५४
देव्युवाच ॥
वरदाहं सुरगणा वरं यन्मनसेप्सितम[2] ॥
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥५५

पा० १ च शमं २ सेच्छथ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

देवा ऊचुः ॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥५६

देव्युवाच ॥

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ॥
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥५७
नन्दगोपगृहे[1] जाता यशोदागर्भसम्भवा ॥
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥५८
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥
अवतीर्य हतिष्यामि वैप्रचितांश्च[2] दानवान् ॥५९
भक्षयन्त्यास्तथैवोग्रान्[3] वैप्रचिन्तान्महासुरान् ॥
रक्ता दन्ता भविष्यन्ति दाडीमीकुसुमोपमाः ॥६०
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥६१
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ॥
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ॥६२
ततः शतेन नेत्राणां निरीक्षिष्यामहं[4] मुनीन् ॥
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥६३

पा० १ कुल २ स्तु ३ श्च तानुग्रान ४ भियं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥
भविष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥६४
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ॥
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥६५
दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति ॥
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥६६
रक्षांसि भक्षयिष्यामि[1] मुनिनां त्राणकारणात् ॥
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥६७
भीमा देवीति विख्यातं तन्मे नाम भविष्यति ॥
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥६८
तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम् ॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥६९
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥
× रक्ताक्षं च हनिष्यामि रक्तचण्डीतिनामतः ॥७०
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ॥७१

पा० १ क्षयविष्यामि (क्षपयिष्यामि इति वा) । × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये नारायणि स्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥

उवाच ५ श्लोक ७१ जम्मा ६४३

अरूमा भन्दा यसमा १ हरफ ॥ श्लोक बढ़ी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

द्वादशोऽध्यायः

नमश्चण्डिकायै

श्री देव्युवाच ॥

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥
तस्याहं सकलां बाधां १शमयिष्याम्यसंशयम् ॥१

मधुकैटभनाशं च महिषासुरघातनम् ॥
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयोः ॥२

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥३

न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः ॥
भविष्यन्ति न दारिद्र्यं न चैवेष्टवियोजनम् ॥४

१पा० १ नाशं ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

शत्रुतो न भयं तेषां[1] दस्युतो वा न राजतः ॥
न शस्त्रानलतोयौघात्कदाचित्सम्भविष्यति ॥५
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत्[2] ॥६
उपसर्गानशेषांश्च[3] महामारीसमुद्भवान् ॥
तथा त्रिविधमुत्पातं महात्म्यं शमयेन्मम ॥७
यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ॥
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥८
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ॥
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥९
जानताऽजानता वापि बलिपूजां तथा कृताम् ॥
प्रतोच्छिष्याम्यहं[4] प्रीत्या वह्निहोमं तथा कृतम् ॥१०
शरत्काले महापूजा क्रियते या च वार्षिकी ॥
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥११
सर्वबाधा[5]विनिर्मुक्तो धनधान्यसमान्वितः ॥
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥१२
श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पतयः शुभाः ॥
पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥१३

पा० १ तस्य २ हि तत् ३ स्तु ४ प्रतीच्छिष्यामि ५ सर्वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ॥
वर्द्धते[1] च कुलं पुंसां महात्म्यं मम शृण्वताम् ॥१४

शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥१५

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ॥
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥१६

बालग्रहाभिभूतानां बालानां शान्तिकारकम् ॥
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥१७

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१८

सर्वं ममैतच्चरितं[2] मम सन्निधिकारकम् ॥
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ॥१९

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ॥
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥२०

प्रीतिर्मे क्रियते साऽस्मिन् सकृत्सुचरिते श्रुते ॥
श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥२१

पा० १ नन्दते २ ममैतन्माहात्म्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥२२

तस्मिश्रुते[1] वैरिकृतं भयं पुंसा न जायते ॥
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥२३

ब्रह्मणा च कृतास्तातु प्रयच्छन्ति शुभां मतिम् ॥
अरण्ये प्रान्तरे दुर्गे[2] दावाग्निपरिवारितः ॥२४

दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥
सिंहव्याघ्रानुजातो[3] वा वने वा वनहस्तिभिः ॥२५

राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ॥
आघुर्णितो वा वातेन स्थितः पोते महार्णवे ॥२६

पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥
सर्वबाधासु घोरासु वेदनाभ्यार्दितोऽपि वा ॥२७

स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् ॥
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥२८

दूरादेव पलायन्ते स्मरतश्चरितं मम ॥
× महासर्पेण दष्टोवा सर्पेनानु गतोऽपि वा ॥२९

पा० १ च्छ्रुते २ वापि ३ थातो × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ।।

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ।।
पश्यतां सर्वदेवानां तत्रैवान्तरधीयत ।।३०

तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा ।।
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ।।३१

दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ।।
जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे ।।३२

निशुम्भे च महावीर्ये शेषाः पातालमाययुः ।।
एवं भगवती देवी सा नित्यापि पुनः पुनः ।।३३

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ।।
सम्भूय कुरुते भूप जगतः परिपालनम् ।।३४

सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ।।
व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ।।३५

महाकाल्या महाकाले महामारीस्वरूपया ।।
सैव काले महामारी सैव सृष्टिर्भवत्यजा ।।३६

स्थितिं करोति भूतानां सैव काले सनातनी ।।
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ।।३७

पा० १ मेव ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सैवाभावे [1]महालक्ष्मीर्विनाशायोपजायते ॥
स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिस्तथा ॥३८

× सैव दारिद्र्यनिर्नाशी सैव सर्वार्तिहारिणी ॥
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम्[2] ॥३९

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये फलस्तुतिर्नाम द्वादशोऽध्यायः ॥ १२ ॥

उवाच २ श्लोक ३९ जम्मा ६८२

अरूमा भन्दा यसमा २ हरफ १ श्लोक बढ़ी छ ।

पा० १ तथा २ तथा × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्री चण्डिकासप्तशती

त्रयोदशोऽध्यायः

नमश्चण्डिकायै

ऋषिरुवाच ॥

एतत्ते कथितं राजन्[1] देवीमहात्म्यमुत्तमम् ॥
× तया व्याप्तं जगत्सर्वं भूतं भव्यं च सर्वदा ॥१
एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥
विद्या तथैव क्रियते भगवद्विष्णुमायया ॥२
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥३
तामुपैहि महाराज शरणं परमेश्वरीम् ॥
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥४

---

[1] पा० २ भूत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

श्रीमार्कण्डेयउवाच ॥

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥
प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ॥५
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥६
संदर्शनार्थमम्बाया नदीपुलिनमाश्रित[1] ॥
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥७
तौ तस्मिन् पुलिने देव्याः कृत्वामूर्तिं महीमयीम् ॥
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥८
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥
ददतुस्तौ बलिं चैव निजगात्रासृगुच्छितम्[2] ॥९
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥१०

देव्युवाच ॥

यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ॥
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते[3] ॥११

मार्कण्डेय उवाच ॥

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥१२

पा० १ सस्थितः २ क्षितम् ३ तत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥१३

देव्युवाच ॥

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥
हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥१४
मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः ॥
सावर्णिको नाम[1] मनुर्भवान् भुवि भविष्यति ॥१५
वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥१६

मार्कण्डेय उवाच ॥

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ॥
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥१७
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनु ॥१८

—:०:—

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये वैश्यवरप्रदानं नाम त्रयोदशोऽध्यायः ॥१३॥

उवाच ६ श्लोक १८ जम्मा ७००

अरूमा भन्दा यसमा १ हरफ ॥ श्लोक बढ़ी छ ।

पा० १ मनुर्नाम ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चण्डीभक्तिविनोदिनी

सप्तशती चण्डी

समाप्त

श्री नवमीसिंह

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ प्राधानिकं रहस्यम्

अथास्य रहस्यत्रयस्य आद्यपूमान्नारायणऋषिः अनुष्टुपछन्द महालक्ष्मी देवता मायार्णोक्ता महाकाली मुख्या देव्या शक्तयः महालक्ष्म्यन्ता ब्रह्माणी सिन्धु नानाबीजं इन्द्र रूद्राद्या देवाः पुमांस्तत्व सर्व सिद्धयर्थं जपे विनियोगः ॥

राजोवाच ॥

भगवन्नवतारा मे चण्डिकाया स्त्वयोदितम्[1] ॥
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥१

आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥
विधाना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥२

पा० १ ताः

CC-0. Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ऋषिरुवाच ॥

इदं रहस्यं परममनाख्येयं प्रचक्षते ॥
भक्तोऽसीति न मे किञ्चित्त्वया वाच्यं[1] नराधिप ॥३
सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥४
मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥
नागं लिङ्गं च योनिं च बिभ्रतो नृप मूर्द्धनि ॥५
तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ॥
शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥६
शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ॥
बभार रूपमपरं[2] तमसा केवलेन हि ॥७
सा भिन्नाञ्जनसंकाशा दंष्ट्राङ्कितवराननना ॥
विशाललोचना नारी बभूव तनुमध्यमा ॥८
खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥
कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम् ॥९
सा प्रोवाच महालक्ष्मीं तामसीं[3] प्रमदोत्तम्[4] ॥
नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः ॥१०
तां प्रोवाच महालक्ष्मीं तामसीं प्रमदोत्तमाम् ॥
ददामि तव नामानि यानि कर्माणि भूतले[5] ॥११

पा० १ किञ्चित्त्ववावाच्यं २ परम रूपं ३ तामसी ४ प्रमदोत्तमा ५ तानि ते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

महामाया महालक्ष्मी[1] महामारी क्षुधा तृषा ॥
निद्रा निशा चैकवीरा कालरात्रिर्दुरत्यया ॥१२
इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ॥
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥१३
तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ॥
सत्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ ॥१४
अक्षमालाङ्कुशधरा विद्यापुस्तकधारिणी ॥
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥१५
महाविद्या महावाणी भारती वाक् सरस्वती ॥
आर्या ब्राह्मी महाधेनुर्वेदगर्भा च धीश्वरी ॥१६
अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ॥
युवाञ्जनयतां देव्यो[2] मिथुने स्वानुरूपतः ॥१७
इत्युक्त्वा सा महालक्ष्मीस्ससर्ज[3] मिथुनं स्वयम् ॥
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥१८
ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नर[4] ॥
श्रीः पद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम् ॥१९
महाकाली भारती च मिथुने सृजतः सह ॥
एतयोरपि रूपाणि तयोरपि[5] वदामि ते ॥२०

पा० १ महाकाली २ युवां जनयतां देव्यौ ३ महालक्ष्मीः ससर्ज ४ नरम् ५ नामानि च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ॥
जनयामास पुरुषं महाकाल्या[1] सितां स्त्रियम् ॥२१

स रुद्रः शंकरः स्थाणु कपर्दी च त्रिलोचनः ॥
त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥२२

सरस्वती स्त्रियं गौरी कृष्णं च पुरुषं नृपः ॥
जनयामास नामानि तयोरपि वदामि ते ॥२३

विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥
उमा गौरी सती चण्डी सुन्दरी सुभगा सुखा[2] ॥२४

एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥
चक्षुष्मन्तो नु पश्यन्ति नेतरेऽतद्विदो बुधा[3] ॥२५

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रय[4] ॥
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥२६

स्वरया सह संभूय विरिञ्चोऽण्डमजीजनत्[5] ॥
विभेद भगवान् रुद्रस्तद्गौर्या[6] सह वीर्यवान् ॥२७

अण्डमध्ये प्रधानादि कार्यजातमभून्नृप ॥
महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम् ॥२८

पा० १ महाकाल २ शिवा ३ जनाः ४ त्रयीम् ५ विरिञ्चोऽण्ड-मजीजनत् ६ रुद्रस्तद्गौर्या ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पुपोष पालयामास तं लक्ष्म्या[1] सह केशवः[2] ॥
महालक्ष्मी रेवभाजां राजत् सर्वेश्वरेश्वरी ॥२९
निराकारा च साकारा सैव नानाभिधानभृत् ॥
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन कस्यचित्[3] ॥३०

❋

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीत्रयो प्राधानिक रहस्यं नाम प्रथमोऽध्यायः ॥१॥

पा० १ तल्लक्ष्म्या २ संजहार जगत्सर्वं सहगौर्या महेश्वरः ॥
३ केनचित् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ वैकृतिकं रहस्यम्

ऋषिरुवाच ॥

त्रिगुणा तामसी देवी सत्त्विकी या त्रिधोदिता ॥
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीष्यते[1] ॥१
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥२
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ॥
विशाल लोचना नारी बभूव तनु मध्यमा[2] ॥३
× हिमालयसुता राजन्[3] त्रिंशल्लोचनमालया ॥
स्फुरद्दशनदंष्ट्राभी[4] भीमरूपाऽपि[5] भूमिप ॥४
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः ॥
खड्गबाणगदाशूलशंखचक्रभुशुण्डिभृत् ॥५

पा० १ र्यते २ विशालया राजमाना त्रिंशल्लोचनमालमा ॥
३ यसमा बढी ४ सा ५ भीमरूपापि × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ॥
एषा सा वैष्णवी माया महाकाली दुरत्यया ॥६
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम् ॥
सर्वदेवशरीरेभ्यो याऽऽविर्भूतामितप्रभा ॥७
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥
श्वेताननना नीलभुजा सुश्वेतस्तनमण्डला ॥८
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ॥
सुवृत्तजघना[1] चित्रमाल्याम्बरविभूषणा ॥९
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ॥
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥१०
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ॥
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदाम् ॥११
चक्रं त्रिशूलं परशुं शंखो घण्टा च पाशकः ॥
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुम्[2] ॥१२
अलंकृतभुजामेभिरायुधैः कमलासनाम् ॥
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥१३
पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥
गौरीदेहात्समुद्भूते[3] या सत्त्वैकगुणाश्रयात् ॥१४

---

१ सुचित्र २ कमण्डलुः ३ त्समुद्भूता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

साचात्सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥
दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ॥१५
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥१६

निशुम्भमथनी देवी शुम्भासुरनिबर्हिणी ॥
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥१७

उपासनं जगन्मातुः पृथगासां निशामय ॥
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥१८

दक्षिणोत्तरयोः पूज्ये पृष्टतो मिथुनत्रयम् ॥
विरिञ्चि[1] स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥१९

वामे लक्ष्म्या हृषिकेशः पुरतो देवतात्रयम् ॥
अष्टादशभुजा मध्ये वामे चास्याः दशानना ॥२०

दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समुच्यते [2] ॥
अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥२१

दशानना चाष्टभुजा दक्षिणोत्तरयोस्तथा[3] ॥
× यदा ननादशा पूज्या दक्षिणोत्तरयोस्तदा ॥२२

कालमृत्यू च सम्पूज्यौ सर्वारिष्टप्रशान्तये ॥
यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी ॥२३

पा० १ विरञ्चि २ समर्चयत् ३ स्तदा × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

× पूर्वादिदलतः पूज्या असिताङ्गादि भैरवा ॥
नवास्याः शक्तयः पूज्यास्तथा[1] रुद्रविनायकौ ॥२४
नमो देव्या इति मन्त्रैर्महालक्ष्मी[2] समर्चयेत् ॥
अवतारत्रयार्चायां स्तोत्रमन्त्रास्तपाश्रयाः[3] ॥२५
अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती[4] ॥२६
महिषान्तकरी येन पूजिता सा[5] जगत्प्रभुः ॥
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥२७
अर्घ्यादिभिरलंकारैर्गन्धपुष्पैस्तथोत्तमै[6] ॥
धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥२८
सधिराक्तेन[7] विधिना[8] मांसेन सुरया नृपः[9] ॥
प्रणामाचमनीयेन चन्दनेन सुगन्धिना ॥२९
सकर्पूरैश्च ताम्बुलैर्भक्तिभावसमन्वितैः ॥
वामभागेऽग्रतो देव्याश्छिन्नाशीर्षं महासुरम् ॥३०
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥३१

पा० १ स्तदा २ स्तोत्रं महालक्ष्मीं ३ स्तदा
४ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥
५ स ६ स्तथाक्षतैः ७ रुधिराक्तेन ८ बलिना ×यसमा वढी छ
९ बलिमांसादिपूजेय विप्रवर्ज्या मयेरिता ॥
तेषां किल सुरामांसैर्नोक्ता पूजा नृप क्वचित् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वाहनं पूजयेद्देव्या धृतं येन चराचरम्[1] ॥
एकेन वा मध्यमेन नैकेनेतरयोरिह ॥३२

चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ॥
× स्तोत्रमन्त्रैस्तुवीतेसां यदि वा जगदम्बिकाम् ॥३३

प्रदक्षिणा नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ॥३४

प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ॥
जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ॥३५

नमो नम[2] पदैर्देवीं पूजयेत्सुसमाहितः ॥
प्रयतः प्राञ्जलिः प्राह्वः प्रणम्यारोप्य चात्मनि ॥३६

सुचिरम्भावयेदीशां[3] चण्डिकान्तन्मयो भवेत् ॥
कुर्याच्च स्तवनं धिमांस्तस्य एकाग्रमानसः ॥३७

एवं संपूजयेद्भक्त्या[4] प्रत्यहं परमेश्वरीम् ॥
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात् ॥३८

यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ॥
भस्मीकृत्वास्य पुण्यानि निर्दहेतमयीश्वरी[5] ॥३९

पा० १ ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः ॥
२ भूयो नाम ३ सुचिरं भावयेदीशां ४ यः पुजयेद्भक्त्या
५ निर्दहेत्परमेश्वरी × यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥४०

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये मूर्तिरहस्यनाम द्वितीयोऽध्यायः ॥ २ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ मूर्तिरहस्यम्

ऋषिरुवाच ॥

नन्दा भगवती नाम या भविष्यति नन्दजा ॥
सा स्तुता[1] पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥१
कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ॥
देवी कनकवर्णा हि[2] कनकोत्तमभूषणा ॥२
कमलाङ्कुशपाशाब्जैर[3]लंकृतचतुर्भुजा ॥
इन्दिरा कमला लक्ष्मीः सा श्री रुक्माम्बुजासना ॥३
या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ ॥
तस्याः स्वरूपं वक्ष्यामि शृणु पाप[4] भयापहम् ॥४
× यः श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशय ॥
रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ॥५

पा० १ स्तुता सा २ कनकवर्णाभा ३ पाशाब्जै ४ सर्व
× यसमा बढी छ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

रक्तायुधा रक्तनेत्रा रक्तकेशाति[1]भीषणा ॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदंष्ट्रिका[2] ॥६
पतिं नारीवानुरक्ता[3] देवी भक्तं भजेज्जनम् ॥
वसुधे च[4] विशाला सा सुमेरुयुगलस्तनी ॥७
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ[5] ॥
कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधि ॥८
भक्तान् सम्पाययेद् देवी[6] सर्वकाम दुघौ[7] स्तनौ ॥
खड्गं पात्रं च मुशलं लाङ्गलं च बिभर्ति सा ॥९
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च ॥
अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् ॥१०
इमां यः पूजयेद् भक्त्या स व्याप्नोति चराचरम्[8] ॥
अधीते य इमं नित्यं[9] रक्तदन्त्या वपुःस्तवम्[10]॥११
तं ता[11]परिचरेद् देवी पतिं प्रियमिवाङ्गना ॥
शाकम्भरी नीलवर्णा नीलोत्पलविलोचना ॥१२
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥
सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी ॥१३

पा० १ रक्तकेशाति २ दान्तिका ३ पतिं नारीवानुरक्ता ४ वसुधेव ५ मनोहरौ ६ सम्पाययद्देवी ७ सर्वकामदुधौ ८ भुक्त्वा भोगान् यथाकामं देवी सायुज्यमाप्नुयात् ॥ ९ इमं नित्यं १० वपुःस्तवम् ११ तं सा।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मुष्टिं[1] शिलीमुखापूर्णं कमलं कमलालया ॥
पुष्पपल्लवमूलादिफलाढ्यं शाकसञ्चयम् ॥१४
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम्[2] ॥
कार्मुकं च स्फुरत्कान्तिं बिभ्रती परमेश्वरी ॥१५
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिका[3] ॥
उमा गौरी सती चण्डी कालिका सा तु[4] पार्वती ॥१६
शाकम्भरीं स्तुवन् ध्यायञ्जपन् सम्पूजयन्नमम् ॥
अक्षय्यमश्नुते ये शीघ्रमन्नपानारसाहन[5] ॥१७
भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥
विशाललोचना नारी [6]पीनोन्नतपयोधरा ॥१८
चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥
एकवीरा कालरात्रिः सैवोक्ता कामता स्तुता[7] ॥१९
तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ॥
चित्रानुलेपना देवी चित्राभरणभूषिता ॥२०
चित्रभ्रमरपाणिः सा माहामारीति गीयते ॥
इति ते[8] मूर्तयो देव्या याः ख्याता वसुधाधिप ॥२१

पा० १ मुष्टि २ भयापहम् ३ विशोका दुष्टदमनी शमनी दुरितापदाम् ४ च ५ अक्षय्यमश्नुते शीघ्रमन्नपानामृतफलम् ॥ ६ वृत्तपिनपयोधरा ७ कामदा स्तुता ८ इत्येता मूर्तयो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः ॥
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥२२
व्याख्यानं दिव्यमूर्तिनामभिष्टफलदायकम् ॥
तस्मात् सर्वप्रयत्नेन सर्वकामफलप्रदम्[1] ॥२३

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये मूर्तिरहस्यं नाम तृतीयोऽध्यायः ॥ ३ ॥

पा० १ देवीं जप निरन्तरम् ॥
सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ॥
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः ॥
देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत् ॥
एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि ॥
सर्वरूपमयी देवी सर्वं देवीमयं जगत् ॥
अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ पाठ-विधान

शम्भुनित्यातन्त्रे ॥

मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठेत् ॥
जपं विना भवेच्चण्डी वरदा तस्य सर्वदा ॥१

पुटितं मूलमन्त्रेण जपन्नाप्नोति वाञ्छितम् ॥
शतमादौ शतं चान्ते जपेत्मन्त्रं नवाक्षरम् ॥२

सप्तशतीकल्पे ॥

ऋषिरुवाच ॥

नित्यं चंड्यादिजाप्यस्य विधानन्ते वदाम्यहम् ॥
क्रमेण सर्वकार्याणां सिद्धये यज्ञपुण्यदम् ॥

पूर्वोक्तेन विधानेन कृत्वा तु तर्पणादिकम् ॥
सुद्धोभूत्वा मनःस्तम्भो मासं प्रतिदिनं जपेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सकृद्रहस्यसंयुक्तं चण्डिकाचरितत्रयम् ॥
दशांशहोमसहितं तोष्यते नित्यचण्डिका ॥
नवार्णरेण मन्त्रेण स्मार्ताग्नौ नृपनन्दन ॥
नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥
अनेन श्लोकपाठेन जुहुयाद्वा शुभं हविः ॥
उद्धृतः प्रोक्षणैर्मन्त्रैः पात्रानीतः समुज्वलः ॥
संस्कृतायां भुवि स्थाप्य स्मार्तोऽग्निः संप्रकीर्तितः ॥
देवतार्चनजाप्यस्य होमे भूः संस्कृतोन्यथा ॥
कृत्वा संस्थापयेदग्निं नान्यदासादनं मतम् ॥
स्मार्ते हि पायसं होमे हुते स्मार्ते हुतासने ॥
तदभावे समित्सर्पिस्तिलानां हवनं भवेत् ॥
होमयेच्च महालक्ष्म्या ऋतुकाले यदुद्भवम् ॥

मेरुतन्त्रे ॥

पायसान्नैस्त्रि[1]मध्वक्तैर्द्राक्षारम्भाफलैरपि ॥
मातुलिङ्गैरिक्षुखण्डैर्नारिकेलफलै[2]स्तिलैः ॥
जातीफलैराम्रफलैः रम्यैर्मधुरवस्तुभिः ॥
सप्तसत्या दशावृत्या प्रतिश्लोकं हुतं चरेत् ॥
अयुतञ्च नवार्णेन स्थापितेऽग्नौ विधानतः ॥

पा० १ स्तु २ पुरै ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

हादिमते ॥

सजपं होमनैवेद्य[1] महालक्ष्मीं प्रणम्य च ॥
शूलेन पाहि नो देवि शत[2]श्लोकैः प्रदक्षिणम् ॥
विदध्यात् सुस्थिरो भूत्वा चण्डिकाध्यानतत्परः ॥
नमो देव्या इति श्लोकैः पठेत्संग्रामवर्जितः[3] ॥
कृत्वा पञ्चनमस्कारानुपविश्यासने शुभे ॥
सर्वस्वरूपे इत्यादि दिग्भि[4] श्लोकैः कृताञ्जलिः ॥
कृत्वा वरणदेवानां होमन्तन्नाममन्त्रतः ॥
कृत्वा पूर्णाहुतिं सम्यग् देवमग्निं विसृज्य च ॥
स्वशरीरे समारोप्य दत्वा तस्यै[5] विसर्जनम् ॥
प्रार्थयेज्जगतां[6] धात्रीं प्रणता स्म हृदि स्थिताम्[7] ॥

शम्भुनित्यातन्त्रे ॥

अनेन विधिना भूयो यः [8]कुर्याच्चण्डिकार्च्चनम् ॥
तस्य तुष्टा महालक्ष्मीर्यद् ददाति शृणुष्व तत् ॥
महदैश्वर्यमतुलं त्रैलोक्यं तस्य जायते ॥
धर्मराज्यसमायुक्तं पुत्रपौत्रसमन्वितम्[9] ॥
तं करोति महालक्ष्मीर्ब्रह्मविष्णुशिवोपमम् ॥

पा० १ होममावैद्य २ त्यैते ३ पञ्चभिर्ध्यानतत्परः ४ षड्भि ५ दधादस्यै ६ जनता ७ प्रपातः सन् हृदिप्सितम ८ यस्तु प्र. ९ समाकुलम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

रिपवः प्रलयं यान्ति तत्स्थानाच्छतयोजनम् ॥

मेरूतन्त्रे ॥

अभिषिंचेच्च यष्टारं विप्रौऽद्यः कलशोदकैः ॥
निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत् ॥
भोजयेच्च पृथग्विप्रान्भक्ष्यभोज्यैः पृथग्विधैः ॥
तस्यापि दक्षिणां दत्वा गृह्णीयादाशिषस्ततः ॥
एवं कृते जगद्वश्यं सर्वे नश्यंत्युपद्रवाः ॥
राज्यं धनयशःपुत्रानिष्टमन्यं लभेत च ॥
त्रिषु लोकेषु यत्किञ्चित्सुरासुरसुदुर्ल्लभम् ॥
तत्सर्वं तं समायाति महालक्ष्मीप्रसादतः ॥

वाराहीतन्त्रे ॥

नातः परतरं किञ्चित्स्तोत्रमस्ति[1] वरानने ॥
भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥

इति नवमीसिंहकृतायां चण्डिभक्तिविनोदिन्यां पाठविधानं नाम द्वितीयः पटलः ॥

पा० १ स्तोत्रं किञ्चिदस्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ पुरश्चरणम्

वायवीयसंहितायाम् ॥

जीवहीनो यथा देवि सर्वकर्मसु न क्षमः ॥
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्तितः ॥

वीरचूडामणौ ॥

पुरश्चरणहीनस्य मन्त्रसिद्धिर्न जायते ॥
आदौ पुरस्क्रियां कुर्यान्नियमेन यथा विधिः ॥

मेरूतन्त्रे ॥

चण्डीं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः ॥
पायसान्नेन जुहयात्पूजिते हेमरेतसि ॥
तर्पणं मार्जनं ब्राह्म भोजनं सर्वधारणम् ॥
तद्वच्चण्डीपाठरूपपुरश्चरणम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कालीतन्त्रे ॥

आदौपुरस्क्रियां कुर्यान्नियमेन यथाविधिः ॥
ततः सिद्धिर्मनुर्मन्त्रो प्रयोगार्हो न चान्यथा ॥

तदुक्तं मरीचिकल्पे ॥

सप्तसत्या विधानञ्च पुरश्चरणपूर्वकम् ॥
योगांश्च विविधान्वक्ष्ये सर्वार्थस्य च साधकान् ॥
कृष्णाष्टम्याः समारभ्य यावत् कृष्णचतुर्दशीम् ॥
जपेदेकोत्तरावृत्तिं देवीसूक्तं च पूर्वकम् ॥
रात्रिसूक्तं जपेदादौ मध्ये सप्तसतीस्तवम् ॥
प्रान्ते देव्याश्च सूक्तञ्च पौरश्चारणीकक्रमः ॥
तदन्ते हवनं कृत्वा प्रतिश्लोकेन पायसम् ॥
रात्रिसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम् ॥
हुत्वाऽन्ते सिद्धयेः स्तोत्रमादौ पूजादिकं मुने ॥
सौवर्णीं प्रतिमान्देव्याः कारयेन्तिष्कमानतः ॥
यन्त्रं वा कारयेन्मन्त्री तदर्द्धं नापि शक्तितः ॥
मण्डले सर्वतोभद्रे षट्कोणाङ्कितकर्णिके ॥
वक्ष्यमाणेन विधिना पीठं देव्याः प्रपूजयेत् ॥
जयाख्या विजया भद्रा भद्रकाली ततः परम् ॥
मुमुखी दुर्मुखी संज्ञा पश्चाद्व्याघ्रमुखी तथा ॥
अथ सिंहमुखी दुर्गा नवशक्तीः प्रपूजयेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स्वस्वमन्त्रेण विधिना पूजयेत्तद्यथा क्रमम् ॥
आसनं मूलमन्त्रेण दद्यादुक्तेन साधकः ॥
मूर्तिं मूलेन संकल्प्य तस्यामावाह्य पूजयेत् ॥
संपूज्य विधिवत्पूज्यामुपचारादिकाः क्रमात् ॥
मातृका गणशक्तीश्च पूजयेद्विधिपूर्वकम् ॥
नैवेद्यान्तं समभ्यर्च्य ततो ध्यानं समाचरेत् ॥
मन्त्रेण नवदुर्गाया अथवा जातवेदसः ॥
नवार्चयेथवा मन्त्रो दुर्गामन्त्रं प्रशस्यते ॥
इमं स्तवं जपेद्देव्याः सिद्धिदं स्तवमुत्तमम् ॥
इति चण्डिपाठपुरश्चरणम् ॥

अथावृत्तिफलम्

वाराहीतन्त्रे ॥

चण्डीपाठफलं देवि शृणुष्व गदतो मम ॥
एकावृत्त्यादिपाठानां यथावत्कथयामि ते ॥
संकल्प्य पूर्वं संपूज्य यस्याङ्गेषु मनुन्सकृत् ॥
उपसर्गोपशान्त्यर्थं त्रिरावृतिं पठेन्नरः ॥
ग्रहोपशान्त्यै कर्त्तव्यं पञ्चवृतिं वरानने ॥
महाभये समुत्पन्ने सप्तावृत्तिमुदीरयेत् ॥
नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत् ॥
अक्कावृत्या काम्यसिद्धिर्वैरिहानि श्च जायते ॥
मन्त्रावृत्त्य रिपोर्वश्यं तथा स्त्रीवश्यतामियात् ॥
सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः ॥
कलावृत्या पुत्रपौत्रधनधान्यागमं विदुः ॥
राजभीतिविनाशाय वैरस्योच्चाटनाय च ॥
कुर्य्यात्सप्तदशावृत्तिं तथाऽष्टादशकं प्रिये ॥
महाव्रणविमोक्षाय विंशावृत्तिं पठेन्नरः ॥
पञ्चविंशावर्तनाच्च भवेद्बन्धविमोक्षणम् ॥
सङ्कटे समनुप्राप्ते दुश्चिकित्सामये सदा ॥
जातिध्वंसे कुलेच्छेदे आयुषो नाशमागते ॥
वैरवृद्धौ व्याधिवृद्धौ धननाशे प्रजाक्षये ॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके ॥
कुर्याद्यत्नाच्छतावृत्तिं ततः संपद्यते शुभम् ॥
जयवृद्धिः शतावृत्या राज्यवृद्ध्यै सदा पठेत् ॥
मनसा चिन्तितं देवि सिद्धेदष्टोत्तराच्छतात् ॥
शताश्वमेधयज्ञानां फलं प्राप्नोति मुत्रेत ॥
सहस्रावर्त्तनालक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा कामी यथाकामान् नरो मोक्षमवाप्नुयात् ॥
यथाश्वमेधः क्रतुषु देवानाञ्च यथा हरिः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ॥

दक्षिणाव्यवस्थोक्ता ॥

हरगौरीसंवादे ॥

पञ्चस्वर्णाः शतावृत्ते पञ्चाशद्वृत्ते तु तन्त्रयम् ॥
पञ्चाशद्वृत्ते स्वर्णमेकं त्रिरावृत्ते तदर्द्धकम् ॥
एकावृत्ते पादमेकं दद्याद्वाशक्तितो बुधः ॥

अथ काम्यानि

मार्कण्डेयपुराणे ॥

तुष्टिपुष्टिसुकीर्तिनां सिद्धये सर्वकर्मणाम् ॥
यथा ध्यानं तथा कुर्यात्पूजने जपकर्मणि ॥
बुद्धीनान्देवतार्चानां प्राप्तये शुभकर्मणाम् ॥
शुद्धस्फटिकसंकाशं ध्यानं स्यात्पूजने मतम् ॥
वश्ये रक्ततरं ध्यायेत्कर्तुरं हर्षवेगयोः ॥
भ्रूभ्रमुच्चाटनाद्येषु कृष्णं ध्यानं च मारणे ॥
नीलोत्पलदलश्यामं ध्यात्वा भवति सुप्रजाः ॥
सर्वरत्ननिभाकारं ध्यात्वा निश्चलमानसः ॥
सर्वान्कामानवाप्नोति ध्रुवमुक्तं मया तव ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कल्पान्ताग्निसमं युद्धे ध्यानं प्रोक्तं स्वयंभुवा ॥
महारोषसमायुक्तं ध्यानं वैरि भये ध्रुवम् ॥
पीयूषवर्णसंयुक्तं पूर्णचन्द्रसमप्रभम् ॥
ध्यानं कृत्वा लभेत्सत्यं शीघ्रं सर्वान्मनोरथान् ॥
चतुरस्रे सुशान्त्यादौ पीठे पूजा महाफलम् ॥
वश्यादौ वर्त्तुलं तद्वदर्द्धचन्द्रे सुपोषकः ॥
त्रिकोणे वा विशुद्धा सा पंचकोणेऽथवा भवेत् ॥
षट्कोणे पीठपूजायां निर्भयन्तत्क्षणाद्भवेत् ॥
खण्डनादौ रविमिते पीठे या पूजनक्रिया ॥
विधूनयति शत्रूणां सप्तरात्रान्मनांसि वै ॥

हरगौरीसंवादे ॥

श्रीकामः पुत्रकामोः वा सृष्टिमार्गक्रमेण च ॥
जपेच्छक्रादिमारभ्य शुम्भदैत्यवधावधि ॥
आदिमारभ्य प्रजपेत्पश्चाच्छेषं समापयेत् ॥
शान्त्यादिकामः सर्वत्रः स्थितिमार्गक्रमेण तु ॥
सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः ॥
संहारे चान्त्यमारभ्य पश्चादादिं समापयेत् ॥

मेरूतन्त्रे ॥

तत्रादिमं चरित्रं तु रोगनाशाय योजयेत् ॥
उपसर्गविनाशाय मध्यमं योजयेद् बुधः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nep

CC-0.In Public Domain. Digitization by eGangotri

अन्त्यं विषयकामास्तु चरित्रं परिशीलयेत् ॥
चरित्रद्वयशीलस्य न वंशःछिद्यते क्वचित् ॥
पठेदाद्यं तु चरितं विपत्तिस्तस्य नश्यति ॥
आद्यन्तं पठते यस्तु मारयेदचिराद्रिपून् ॥
स्वशत्रूं दैत्यभावेन स्वमित्रान्देवता धिया ॥
भावयन्यो जपेच्चण्डि त्रिसंध्यं मासमात्रकम् ॥
मृता वा मृतकल्पा वा शत्रवः स्यूर्न संशयः ॥
स्वार्थानुसारी पद्यं च सप्तसत्यास्तु यो जपेत् ॥
यस्तन्मन्त्रेण पुटितं तत्प्रस्तारांकसूंख्यया ॥
पठेच्चण्डीं तथाद्यन्ते सकामस्तस्य सिद्ध्यति ॥

अथाष्टचण्डीविधानं ॥

मेरूतन्त्रे ॥

सितपक्षतिमारभ्य चाष्टम्यन्तमिषस्य च ॥
जपेल्लक्षं मनुं होमं स्वाद्यैस्त्रिमधुरप्लुते ॥
प्रत्यहं पूजयेद् देवीं चण्डीमाद्यन्त योः पठेत् ॥
विप्रान् गुरूं समाराध्य वांछितं लभते ध्रुवम् ॥

अथ नवचण्डीविधानं ॥

शम्भुनित्यातन्त्रे ॥

नवचण्डीविधानन्तु कथयस्व महेश्वर ॥

CC-0.In Public Domain. Digitization by eGangotri

येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ॥
शृणु विष्णोरमाकान्त नवचण्डीविधिं शुभम् ॥
यत्कृत्वा प्राप्यते स्वर्गं सर्वकामांश्च पुष्कलान् ॥
आश्विनप्रतिपन्मुख्या पुण्याः स्युः तिथयो नवः ॥
नवचण्डी चये प्रोक्ताः सर्वकामफलप्रदाः ॥
धनपुत्रयशश्रीदा महाव्याधिविनाशिनी ॥
महाभयमहादुःखहन्त्री सौख्यप्रदायिनी ॥

तथा ॥

शुक्लाष्टमीमवष्टभ्य यावत् शुक्लचतुर्दशी ॥
नवदुर्गा विधानज्ञा सर्वकार्यफलार्थिना ॥
संपूज्य विधिवद् देवीं चण्डिकां कृततर्पणम् ॥
कलशं पञ्चरत्नाढ्यं सहकारदलाकुलम् ॥
सवस्त्रं संप्रतिष्ठाप्य चण्डिकाग्रेम्भसाभृतम् ॥
समस्तान्यूजयेद्दिक्षु दिशापालान् यथाक्रमम् ॥
चन्दनेन विलिप्ताङ्ग स्वविन्यासपरायण ॥
नवाहं वारमेकैकं मौनी वद्धासनी जपेत् ॥
कवचादि रहस्यान्तं चण्डिकाचरित्रयम् ॥
चतुरस्रे समे कुण्डे समन्ताद्धस्तमात्रके ॥
एकावरणसंयुक्ते योनिमण्डलमण्डिते ॥
दशांशं विधिना होमयुक्तंद्रव्ये न साधयेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

नवदुर्गामखे[1] कुण्डे मेरवं जानीहि केशव ॥
नित्यं चण्डीविधानेपि कुण्डमीदृक् प्रकीर्तितम् ॥
कृष्णाष्टमीमवष्टभ्य नवदुर्गाविधानवित् ॥
यद्यथा कुरुते जाप्यं कालरात्रिरुदीरिता ॥
महाकालोद्भवं दुःखं कालरात्रिर्व्यपोहति ॥
संस्कारैरष्टभिः कुण्डं सकृत्साग्निं प्रतिष्ठयेत् ॥
मायाबीजं समापेतं दुर्गास्तवनसाधक ॥
कुण्डमध्ये भुवं दर्भैः परिमार्ज्या विलेखयत् ॥
प्रागग्रा ध्रुवमूलेन रेखास्तिस्रः समुल्लिखेत् ॥
पांशुमुद्धृत्य लेखानां समत्पूज्य ततः परं ॥
कुण्डस्य पूजनं स्पष्टं सप्तमं सप्तमुद्रया ॥
अस्त्रावगुण्ठनं कुण्डे संस्कारश्चाष्टमः स्मृतः ॥
शतमङ्गलनामानं कुण्डेग्निं संप्रतिष्ठयेत् ॥
चण्डिकापीठ संपूज्य ब्रह्माणं दक्षिणे द्विजम् ।
तत स्तत्साग्निमत्कुण्डं नवसूत्रेण सूत्रयेत् ॥
कुण्डस्योत्तरतः स्थाप्या प्रणिता वारिपूरिता ॥
प्राणीता पात्रतो याम्ये उत्तरे वैश्वदेवता ॥
स्थापयत्प्रोक्षणीपात्रं प्रणीतोदकपूरितम् ॥

पा० १ नवचण्डीसमकुण्डमेवं २ ह्यो ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रणीता पातत्रतःपूर्वं स्थाप्यं पात्रमनुक्रमात् ॥
आज्यस्थाली चरूस्थाली गव्यक्षीरसमन्विता ॥
स्रुक्स्रुवौ च घृतं गव्यं तण्डुलान् कुशपूर्वकम् ॥
पलाशसमिधस्तिस्रः पूर्णपात्रमतः परम् ॥
सप्तद्वीपेश्वरीं ध्यात्वा गृहीत्वा कुशपूर्वकम् ॥
निक्षिपेत्प्रोक्षणीपात्रे वारूणं बीजमुच्चरन् ॥
तिलदर्भसमूहेन शतसंख्येन संस्थितम् ॥
क्रमात्पात्रगणान्प्रोक्ष्य प्रोक्षणीपात्रवारिणा ॥
आज्यपात्रे चरूस्थाल्यां निक्षिपेद्घृततण्डुलान् ॥
यथाक्रमेण कर्तव्यं ततो मिस्रयणं तयोः ॥
आज्येन पायसे कार्यं पर्यग्निकरणं तयोः ॥
सव्ये पलाशकाष्ठेन तिस्रो दर्भाः समुज्वलम् ॥
श्रुवयोस्तापनं कार्यं प्रणीतोदकसिञ्चितम् ॥
पुनः प्रतापनं कृत्वा दक्षिणे स्थापनं स्मृतम् ॥
उद्धास्य प्रथमं पूर्वादादायाज्यं प्रदक्षिणम् ॥
कुण्डाचार्यान्तरे स्थाप्यं स्ववीजजपपूर्वकम् ॥
अन्विधायाज्यमार्गेण वायव्ये स्थापयेच्चरूम् ॥
स्ववीर्यं जपसंस्काराद्धेनुमुद्रान्तयोर्भवेत् ॥
तिस्रः पालाशसमिधो मौनी वैश्वानरे क्षिपेत् ॥
कुशमूलोपयुक्ताभिः प्रोक्षिण्यद्भिः प्रदक्षिणम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पर्युक्ताग्नि प्रणीतायान्निक्षिपेत्कुशमूलकम् ॥
निधाय दक्षिणं जानुभूमौ वह्निमुखे हुतेत् ॥
अन्वारब्धे श्रुवेणाज्यं निर्धूमे हव्यवाहने ॥
प्रजापती महाकाली महालक्ष्मी सरस्वती ॥
एतदग्निमुखं प्रोक्तं मायाबीजपुरःसरम् ॥
संस्रवान्प्रोक्षणीपात्रे निक्षिपेदग्निसाधना ॥
विदध्यात्कथितं होमे उक्तेन हविषा शमी ॥
तेन स्विष्टिकृतं दद्याद् हविषा सुज्वलेनले ॥
मायाबीजे च ब्राह्मी मोहेश्वरी कौमारी वैष्णवी ॥
वाराही नारसिंही ऐन्द्रि चामुण्डायै विच्चे स्विष्टिकृते स्वाहा ॥
मन्त्रेण स्विष्टिकृताहुते शक्तीनां वक्ष्यमानकैः ॥
आज्यस्य नवकं दद्यात्मायाबीजादिनामभिः ॥
नन्दा भगवती आद्या द्वितीया रक्तदन्तिका ॥
शाकम्भरी तृतीया च दुर्गा भीमा च तत्परा ॥
भ्रामरी कालिका चैव शिवदूती प्रजापतिः ॥
गन्धपुष्पफलोपेतं कृत्वा यज्ञात्मकं श्रुवम् ॥
ततः पूर्णाहुतिं दद्यात् घृतस्याच्छिन्नधारयाः ॥
नवाक्षरेण मन्त्रेण महालक्ष्मीपरायणः ॥
ध्यायेद्यज्ञे पुरोडाशममृतन्देवदुर्लभम् ॥
प्रोक्षणीपात्रमध्यस्थं मन्त्री प्राश्नाति संस्रवान् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

यस्माद्यज्ञरसात्पूता यज्वानो ब्रह्मरूपिणः ॥
संस्रवञ्च पुरोडाशं प्राश्नामि सुखपुण्यदम् ॥
सलिलेन प्रणीतायास्तीर्थध्यानपरायणः ॥
करोति मार्जनं दर्भैः शतेन श्लोकपाठतः ॥
याः शिवायाश्च शक्तयो याभिश्च सविता सह ॥
या आपःस्यन्दधानास्तामेकधारं तु भेषजः ॥
अभिषिंचेदथात्मानं चतुर्भिश्चण्डिकास्तवैः ॥
दानं दद्याद्विधानेन हेमरत्नांबरादिकम् ॥
नवतत्त्वं महादेवी पापताप प्रणाशनम् ॥
सर्वैश्वर्यप्रदा देवी कुर्वतामविलंबना ॥
नवदुर्गाविधानेऽस्मिन् यत्फलं परिकीर्तितम् ॥
कालरात्रीविधानेऽपि तत्फलं लभते ध्रुवम् ॥
एतन्त्रिगुणितं सर्वं नवदुर्गाजपे फलम् ॥
कथितं तव चाप्नोति नवचण्डीकृते जपे ॥
मनसा चिन्तितं कार्यं कार्यसिद्धिः प्रजायते ॥
शारदे चाश्विने मासि शुक्लपक्षे शुभे दिने ॥
प्रतिपत्तिथिमारभ्य नवचण्डीं समारभेत् ॥
तोरणाद्यैः शुभस्थाने सुवितानेस्वलंकृते ॥
पूर्वादिक्रमयोगेन दिग्देवीभ्यो बलिं हरेत् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपैश्चरूभिरुत्तमैः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कादम्बरीगजारूढा पुनरूक्ताजपृष्ठगा ॥
कराली महिषारूढा रक्ताक्षी प्रेतसंस्थिता ॥
श्वेतकौमीरगा श्वेता हरित्रा वृषवाहना ॥
यक्षणी सिंहपृष्ठस्था कंकाली वृषवाहना ॥
हंसपृष्ठे सुरजेष्ठा सर्पेराडहिवाहना ॥
अनेन विधिना दत्वा दिग्देवीभ्यो बलिं जपी ॥
नवग्रहान्लोकपालान् दिक्पालाश्च प्रपूजयेत् ॥
कलशं पञ्चरत्नाद्यं हेमवस्त्रोदकान्वितम् ॥
संप्रतिष्ठाप्य संपूज्य चण्डिकार्चनमारभेत् ॥
पूर्वोक्तेन विधानेन गन्धपुष्पैरनुत्तमैः ॥
वस्त्रालंकार सिंदूर कस्तूर्यगुरूकुंकुमैः ॥
बहुभिर्धूपदीपैश्च नैवद्यैर्वर्णसंस्थयाः ॥
कृत्वा तु पूजनं सर्वं जपेदेकाग्रमानसः ॥
सकृद्रहस्यसंयुक्तं चण्डिकाचरितत्रयम् ॥
कुमारीविप्रमुख्यांश्च भोजयेद्विधिपूर्वकम् ॥
यदाद्यदिवसे कुर्यात् चण्डिकापूजनादिकम् ॥
द्विगुणं तु द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ॥
नवमीतिथिपर्यन्तं बुद्ध्या पूजाजपादिकम् ॥
एकाहारं व्रती कुर्यात्सत्यवाक् नियमैर्युतः ॥
कृत्वा होमादिकं सर्वं नवदुर्गाविधानवित् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वितशाठ्यं परित्यज्य कुर्यादाचार्यतोषणम् ॥
वस्त्रांगुलीयधेन्वादि वाजिहेमप्रदानतः ॥
अशक्तो निष्कमेकं हि दद्यादस्मै प्रयत्नतः ॥
शृणुष्वास्य फलन्देवि यो हि कश्चिदनेन वै ॥
विदधाति विधानेन य एनं नवचण्डिकाम् ॥
इन्द्रब्रह्मादयो देवि समायान्ति प्रसेवितुम् ॥
अपुत्रो लभते पुत्रं निर्द्धनः सुधनो भवेत् ॥
अविद्यो लभते विद्यां स्वकामांश्चापि कार्मुकम् ॥
व्याधयः संक्षयं यान्ति शत्रवश्च सुदारूणाः ॥
न तस्यास्ति भयं किञ्चिद्राजचौराग्निवारिणः ॥

इति नवचण्डीविधानम् ॥

अथ शतचण्डीविधानम् ॥

मेरूतन्त्रे ॥ शम्भुनित्यातन्त्रे च ॥

शतचण्डीविधानन्तु प्रवक्ष्ये प्रीतये नृणाम् ॥
नृपो द्रवआपन्ने दुर्भिक्षे भूमिकम्पने ॥
अतिवृष्टयामनावृष्टौ परचक्रभये क्षये ॥
सर्वे विघ्ना विनश्यन्ति शतचण्डिविधौ कृते ॥
रोगाणां वैरिणां नाशो धनपुत्रसमृद्धयः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वाराहीतन्त्रे ॥

यदा यदा सतां हानिरात्मनो ग्लानिरेव च ॥
तदा कार्यं शतावृत्तिं रिपुघ्नं भूतिवर्द्धनम् ॥
दुःस्वप्नदर्शने घोरे महामारीसमुद्भवे ॥
पुष्टिप्रदं शमावृत्तिं पुंसामायुष्क्षयो न च ॥
महाभये क्लेशयोगे दुर्भिक्षे मरणेऽपि च ॥
कुर्यात्तत्र शतावृत्तिं देवीमहात्म्यमुत्तमम् ॥
प्रश्नत्वे च समुत्पन्ने बान्धवानां महोत्सवे ॥
कुर्याच्चण्डीशतावृत्तिं सर्वसंपत्तिकारकम् ॥
शतावृत्त्या भवेदायुः शतावृत्त्या धनागमः ॥
वश्याः भवन्ति राजानः श्रियमाप्नोत्यनुत्तमाम् ॥
धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम् ॥
विद्यार्थी प्राप्नुयाद्विद्यां रोगी रोगात्प्रमुच्यते ॥
चतुर्वर्गफलावाप्तिकारणं रिपुनाशनम् ॥
चण्डीशतावृत्तिफलं यथास्थाने वरानने ॥

हादिमते ॥

देवीपीठे शिवाभ्यासे त्वदभ्यासे च कारयेत् ॥
देवालये सुतीर्थे वा गोष्ठे द्विजगृहेऽपि वा ॥
पुण्यापुण्ये स्वगृहे वा चण्डिकायजनं भवेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

अथ कालादिव्यवस्था तत्रैव ॥

उत्तराशास्थिते हंसे शुक्लपक्षे तथा शुभे ॥
ज्ञार्केन्दुभृगुजीवे च सुयोगे सुतिथौ तथा ॥
पातक्रकचघण्टादिदोषहीने स्थिरोदये ॥
स्थापयेद्राविनं कुम्भं उत्तराभिमुखः स्वयम् ॥
नविद्याद्धरौ सुप्ते भूकम्पाकालवर्षणे ॥
वर्जयेद्दुर्गमोत्पाते गुर्वादित्यादिके तथा ॥
महागुरौ विपन्ने च संवेशौ कार्यवस्तुनि ॥
शतावृत्त्यादियोगन्तु न विदध्यात्कदाचन ॥
त्रिपञ्च सप्तमिर्वापि नवैर्वा दशभिस्तथा ॥
अदीर्घैर्दिवसैः क्षिप्रं विदध्या चण्डिकामयम् ॥
अयुग्मर्ब्राह्मणैः कार्या शतावृत्तिः सुसिद्धये ॥
त्रिपञ्चसप्तनवभिर्दिनैः पक्षेण वा पुनः ॥
देवीमाहात्म्यपाठन्तु युग्मैर्विप्रैः कृतं तु यत् ॥
निःफलं च भवेत्सर्वं भूतिनाशश्च दुर्मतेः ॥
चतुरस्रं पताकाढ्यं मण्डितं वेदिभूषितम् ॥
षोडशस्तंभसंयुक्तं पुष्पपल्लवशोभितम् ॥
वसुकोणयुतान्वेदीं मध्ये कुर्यान्त्रिभागतः ॥
पञ्चवेष्टकचितां रम्यामुच्छ्राये हस्तसम्मिताम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

सर्वलक्षणसम्पन्नां वेदीं कुर्यात्मनोहराम् ॥
पञ्चवर्णैः रजोभिश्च कुर्यान्मण्डलसंशुभम् ॥
सर्वतोभद्रसंज्ञं च मनोहारि सुशोभनम् ॥
पञ्चवर्णवितानञ्च किंकिणीजालमण्डितम् ॥
प्रवालैर्मौक्तिकैश्छन्नं वध्नीयान्नूतनं शुभम् ॥
श्वेतपुष्पै स्तथा रक्तै पीतैश्चापि सुसंवृतम् ॥
नीलोत्पलैः कोकनदैर्भूषितं श्रीफलैस्तथा ॥
आम्रपल्लवमालाभिर्दुर्वाभिर्मण्डपं शुभम् ॥

मेरूतन्त्रे ॥

मण्डपं द्वारवेद्याढ्यं कुर्यात् सध्वजतोरणम् ॥
तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा ॥

क्रोडतन्त्रे ॥

विधिमन्त्रं प्रवक्ष्यामि शृणुष्व वरवर्णिनि ॥
निमन्त्रयेच्च पूर्वेद्यु र्विप्रान् विद्यासमन्वितान् ॥

मेरूतन्त्रे ॥

स्नात्वा नित्यकृतिं कृत्वा योजयेद्दशवाडवान् ॥
जितेन्द्रियान्सदाचारान् कुलीनान्सत्यवादिनः ॥
व्युत्पन्नाञ्चण्डिकापाठरतान् लज्जादयावतः ॥
मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मार्कण्डेयपुराणे ॥

मधुपर्कविधानेन यथावत्तद्ददाम्यहम् ॥
श्रीपर्णीवृक्षपीठानि हस्तमानानि मानतः ॥
अष्टाङ्गुलसमुच्छ्रायसहितानि समानि च ॥
स्रुवा सुचा समायुक्ता खादिरालक्षनान्विता ॥
सप्तविंशतिदर्भाणां वैश्याग्रे ग्रंथिभूषिताः ॥
विस्तरं सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥
सुखोष्णोदकसंपूर्णां पाद्यार्घे ताम्रपादुकाम् ॥
शंखाश्चार्घ्यप्रदानाय गन्धपुष्पयवान्विता ॥
दुर्वोदकसमायुक्ता स्थापनीया पृथक्पृथक् ॥
सुताम्रस्यकमंडल्व आचमनोदकपूरिताः ॥
संपुटा मधुपर्कार्थं कांस्यदध्यादि संयुता ॥
महान्त्यर्हाणि वस्त्राणि मुद्रिकादिसुभूषणम् ॥
मयूरपत्रछत्राणि सोष्णिषानि समाहरेत् ॥
पादूका आहरेत्तत्र ताम्रभूषणभूषिताः ॥
अन्यस्मार्तं पदंयुक्तं मधुपर्कस्य पूजनम् ॥

मेरूतन्त्रे ॥

जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम् ॥
ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसः ॥
भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवं ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः ॥
शब्दशास्त्रविरूद्धो य पाठसोऽशुभकर्मणिः ॥
शब्दशास्त्रविरूद्धस्तु पाठं शान्तिकपौष्टिके ॥
सार्थस्मृतिपठे चण्डीस्तवं स्पष्टपदाक्षरम् ॥

क्रोडतन्त्रे ॥

आलोलुपान् ऋजून् शान्तान्देव्या भक्तिसमन्वितान् ॥
मन्त्रोपयन्त्रतन्त्रज्ञान् शताबृत्ते नियोजयेत् ॥
आचार्येण समं विप्रान्वरयेद्दशसुव्रतान् ॥
वस्त्रोत्तरीयैः सुशुभैः पाणिमुद्रोपवीतकैः ॥
कर्णाभरणभूषैश्च भोजनैर्वरयेत्सुधीः ॥
ईशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिना नरः ॥
संस्कृत्य भूमिं संस्थाप्य कलशं तीर्थवारिणा ॥
पूरयित्वा स्वर्णगर्भं क्षिपेदष्टौ मृदस्ततः ॥
धर्मकामः क्षिपेत्स्वर्णं धनकामस्तु मौक्तिकं ॥
श्रीकामः कमलं न्यसेत् कामार्थे रोचनं क्षिपेत् ॥
मोक्षकामो न्यसेद्वज्रं जयकामोऽपराजिताम् ॥
उचाटनार्थं व्याघ्रीं च वश्यार्थं शिखिमूलकं ॥
मारणाय मरीचं च क्षितवं मोहनाय च ॥
आकर्षणार्थं सेवन्तीं प्रक्षिपेत्कलशोदरे ॥
मधुपर्कञ्च दद्याद्वै घृतानां विबुधाधिपः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

बारूण्यां च प्रकर्त्तव्यं कुण्डं लक्षणलक्षितम् ॥
मूर्त्तीं देव्याः प्रकुर्वीत सुवर्णस्य पलेन हि ॥
तदर्द्धेन च कुर्यान्तु तदर्द्धेन मतामते ॥
अष्टादशभुजां देवीं कुर्याद्वाष्टकरामपि ॥
षट्कुलयुगच्छन्नां वेदिमध्ये निधापयेत् ॥
प्रतिष्ठापनमन्त्रेण प्रतिष्ठापनमुत्तमम् ॥
पुण्याहवाचनकं कृत्वा पूजयेन्क्रमशस्ततः ॥
नवग्रहान्दिशापालान्तथावरणसप्तकम् ॥
संपूर्णकलशं चैव प्रतिमायाश्च पूजनम् ॥
परितो मण्डलस्थाथबलिदानं सुरेश्वरी ॥
मण्डपस्य चतुर्द्वारे द्वौ द्वौ कुम्भौ निवेशयेत् ॥
तीर्थोदकसुसंपन्नौ स्वर्णपल्लवशोभितौ ॥
ततः संपूजयेद्देवीं गुग्गुलं चागरूं शुभम् ॥
कस्तूरीं कुंकुमं देविकर्पूरं चैव चन्दनं ॥
दिव्यवस्तुमलंकारं सुवर्णरजतान्वितम् ॥
श्वेतपुष्पाणि श्वेताश्च गुग्गुलं चागुरुं शुभम् ॥
ताम्रपात्रे कृतं दीपं श्वेतवर्त्तिं घृतान्वितम् ॥
हविष्यान्नं च नैवद्यं पायसं सक्करान्वितम् ॥
ताम्बूलं वीटकञ्चैव शक्त्या स्वर्णं ददेत् शुभम् ॥
नवचण्डीविधानोक्तं पूजनं सुरदुर्लभम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

दशभिर्ब्राह्मणैःसार्द्धं आचार्येण विधानतः ॥
गृर्वनुज्ञामवाप्याथ जपं कुर्याद् दशद्विजः ॥
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् ॥
चण्डीसप्तशतीमध्ये संपुटोऽयमुदाहृतः ॥
सकामैः संपुटो जाप्यो निष्कामैः संपुटं विना ॥
शुद्धासनेषूपविष्टा न्यासध्यानयुता विभो ॥
चण्डीपाठं प्रकुर्युस्ते चण्डीकाचरितत्रयम् ॥
सहस्यं ऋषिछन्दो देवताशक्तिसंयुतम् ॥
जपेदनूपमैकैकं मौनिनस्त्यक्तमत्सराः ॥
प्रदक्षिणनमस्कारैर्देवीं संतोषयेत्प्रभो ॥

अथ सहस्रचण्डीपाठविधानम् ॥

हादिमते ॥
श्रीभगवानुवाच ॥
भवानीश महादेव नीलकण्ठ उमापते ॥
सहस्रचण्डिकापाठं कथं कुर्यात्सुरेश्वर ॥
कृते तु तेन किंचित्स्यात्तद्वदस्व महेश्वर ॥
ईश्वर उवाच ॥
शृणु विष्णो मम भक्त सहस्रस्य विधानकम् ॥
पुत्रकामेन कर्तव्यं धनकामेन चेश्वर ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

चक्रवर्तित्वकामेन स्तम्भने मारणे तथा ॥
राज्यभ्रष्टे महोत्पाते जनमारे महाभये ॥
गजमारंऽश्वमारे च परचक्रभये तथा ॥
इत्यादि विविधैर्दुःखैरर्जयत्तमादिजे भये ॥
सहस्रचण्डिकापाठं कुर्याद्वाकारयेत्तथा ॥
जापकास्तु शतं प्रोक्ता विंशद्वस्तस्तु मण्डप ॥
भोज्याः सहस्रं विपेन्द्रा गोशतं तत्र सन्दिशेत् ॥
जापकेभ्यो दिशेच्छक्त्या पराद्धार्द्धं तु मनोहरम् ॥
वृद्धं च तिलपात्रन्तु दद्यात्स्वर्णं तथाऽयुतम् ॥
पञ्चनिष्कमिता मूर्तिः कर्त्तव्या चार्द्धमानतः ॥
अष्टादशभुजा देवी सर्वायुधविभूषिता ॥
अवारितान्नं दातव्यं सहस्रं प्रत्यहं विभो ॥
शते चानियतं दानं नवार्णालक्षमात्रकम् ॥
जपे च नियताहारः पयः पानेन वर्त्तयेत् ॥
फलाहारेण वादे च सहस्रं तु स्तुति जपेत् ॥
नानेन सदृशी विद्या विद्यते भुवनत्रये ॥
सहस्रपाठकृत्मर्त्यो राजते सूर्यमण्डले ॥
देवीपूजा प्रकर्त्तव्या पूर्वोक्तेन विशेषतः ॥
पूजनं च कुमारीणां होमं चैव दशांशतः ॥
पूजनञ्चैव कुम्भस्य पूर्वोक्तविधिना प्रभो ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पुनः पूजा प्रकर्त्तव्या रात्रौ जागरणोत्सवम् ॥
यवांकुरानथादाय यजमानाभिषेचनम् ॥
कुर्युर्गुर्वृत्विजः सर्वे मांगल्यकरणं तथा ॥
ततो जनपदैः पौरैः ज्ञातिभिश्च प्रदक्षिणम् ॥
देवालयं च नगरं यजमानः करोति हि ॥
सुरामांसैस्तथारक्तैः कुष्माण्डैर्बलिमाचरेत् ॥
इन्द्रादिलोकपालेभ्यः सायुधेभ्यो यथाक्रमम् ॥
दीनानाथविशिष्टेभ्यः सर्वेभ्यश्च यथागतम् ॥
अन्नदानं विशिष्टं च कुर्याद्देवीप्रियन्नरः ॥
एवं यश्चण्डिकापाठं सहस्रन्तु समाचरेत् ॥
तस्य या स्यात्कार्यसिद्धिर्न्नात्र कार्या विचारणा ॥
अतः परतरं नास्ति त्रिषु लोकेषु माधव ॥
स्तुतिपाठसहस्रस्य फलं प्रोक्तं मया तव ॥
किमन्यच्छ्रोतुमिच्छास्ति तद्वदस्व सुरेश्वर ॥
तव वाक्यामृतं पीत्वा देवी प्रीतिकरं विभो ॥
आनन्दामृतपूर्णोऽहं जातस्त्वद्भक्तिसेवनात् ॥
श्रुत्वा देवीचरित्रं तु नान्यदिच्छामि शंकर ॥
रमाकान्त सुराधीश प्रोक्तं गुह्यतरं मया ॥
नानुसूर्याय वक्तव्यं परशिष्याय नो वदेत् ॥
देवीभक्ताय दातव्यं मम भक्ताय माधव ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

त्वद्भक्ताय च वक्तव्यं न मूर्खायाततायिने ॥
सत्यं सत्यं पुनः सत्यमुद्धृत्य भजमुच्यते ॥
नानया सदृशी विद्या न गंगासदृशी नदी ॥
न वैकुण्ठात्परं स्थानं न मुक्ति नाशिकां विना ॥
न राजा कार्तवीर्याद्धि एतत्सत्यं सुरेश्वर ॥

अथ होमविधि

होमेज्जपदशांशेन पायसं मधुसर्पिषा ॥
नवाक्षरेण मन्त्रेण स्मार्तवैश्वानरे हवि ॥
मूलविद्याया मन्त्रेण होमं कुर्यादनेन वा ॥ ★

अथ कुमारीपूजा ॥

यजमानः पूजयेच्च कन्यानां दशकं शुभम् ॥
द्विवर्षाद्या दशाद्यान्तां कुमारीं परिपूजयेत् ॥
नाधिकाङ्गीं न हीनाङ्गीं कुष्ठिनीच व्रणाङ्कितम् ॥
अन्धां काणां केकराश्च कुरूपां रोमयुक्ततनुम् ॥
दासीजां भोगयुक्तां च दुष्टां कन्यां न पूजयेत् ॥
विप्रां सर्वेष्टसंसिद्धयै यशये क्षत्रियोद्भवाम् ॥

★ यस मुनिका भाग पेज १६१ को दोश्रो हरफ मुनिदेखि परेको छ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वैश्यजां धनलाभाय पुत्राप्त्यै शुद्रजां पूजेत् ॥
द्विवर्षां सा कुमार्युक्ता त्रिमूर्तिर्हायनत्रिका ॥
चतुर्हायना कल्याणी पञ्चवर्षा तु रोहिणी ॥
षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायना ॥
अष्टवर्षा शाम्भवी स्यादुर्गा तु नवहायना ॥
शुभदा दशवर्षोक्ता तामन्त्रैः परिपूजयेत् ॥
एकाब्दायां प्रीत्यभावो रुद्राब्दा तु विवर्जिता ॥
तासामावाहनं मन्त्रं श्लोकरूपो निगद्यते ॥
मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ॥
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥
कुमारीकादिकन्यानां पूजामन्त्रान् ब्रुवेऽधुना ॥
जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ॥
पूजां गृहाण कौमारि जगत्मातर्न्नमोऽस्तुते ॥
त्रिपुरान्त्रिपुराधारान्त्रिवर्गज्ञानरूपिणीम् ॥
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥
कलात्मिकां कलातीतां कारूण्याहृदयां शिवाम् ॥
कल्याणजननीन्नित्यां कल्याणीं पूजयाम्यहम् ॥
कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् ॥
कामदां करूणोदारां कालिकां पूजयाम्यहम् ॥
चण्डवीरां चण्डमयीं चण्डमुण्डप्रभंजिनीम् ॥

 Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥
सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ॥
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ॥
दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ॥
पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम् ॥
सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥
सुभद्रजननीन्देवीं सुभद्रां पूजयाम्यहम् ॥
एतैर्मन्त्रैर्लक्षणाद्यां नान्तां कन्यां समर्चयेत् ॥
गन्धैः पुष्पैः भक्ष्यभोज्यैर्वस्त्रैराभरणैरपि ॥
वेद्यां विरचिते रम्ये सर्वतोभद्रमण्डले ॥
घटं संस्थाप्य विधिवत्तत्राबाह्याचयेच्छिवाम् ॥
तदग्रे कन्यकाश्चापि भोजयेद् ब्राह्मणानपि ॥
उपचारैश्च विविधैः पूर्वोक्ताचरणान्यपि ॥
एवं चतुर्दिनं कृत्वा पञ्चमे होममाचरेत् ॥

शम्भुनित्यातन्त्रे ॥

दद्यादाचमनं तस्यै दद्याद् वस्त्रं सकंचुकम् ॥
सकंकणांगुलीयानिकर्णालंकारशोभनम् ॥
ग्रैवेयकं प्रदत्वा च चंदनेन विलेपयेत् ॥
पूजयेत् पुष्पमालाभिर्दिव्यैर्धूपैः सुधूपयेत् ॥
कुर्यादारार्तिकं देवी उदयं वाच्यतां मुहुः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भोजयेद् भक्तिभावेन पायसं घृतसर्करान् ॥
सुपक्वान्नानि चान्यानि दम्भमोहविवर्जितः ॥
फलानि च सुस्वादूनि दद्यात्तस्यै पुनः पुनः ॥
यावत्सा भोजनं कुर्यात्तावत्स्तोत्रं जपेत्सुधीः ॥
दद्यादाचमनं तस्यै ताम्बुलं च समर्चयेत् ॥
तोषयेद्धेमदानेन कुमारीं प्रणतोऽसकृत् ॥
प्रदक्षिणनमस्कारान् कृत्वा मूर्द्धि कृताञ्जलिः ॥
विसर्जयेत् कुमारीं तां स्वगृहे सत्त्वनिर्भराम् ॥
अनेन विधिना भक्त्या कुमारीं यः स्त्रियं यजेत् ॥
स पृथ्वीराज्यमासाद्य त्रियासायुज्यतां व्रजेत् ॥
यं यं प्रार्थयते कामं देवानामपि दुर्लभम् ॥
कुमारीपूजनं कृत्वा तं तं प्राप्नोत्यसंशयः ॥
ब्रह्मविष्णुमहेशानां कुमारी परमा कला ॥
तत्पूजनेन देवेशि त्रैलोक्यं स्यात्सुपूजितम् ॥
सम्यक् तत्फलदं तस्य चतुर्वेदफलं भवेत् ॥
सर्वतीर्थफलं तस्य यः कुमारीं समर्चयेत् ॥

× × ×

दुर्गायाः परमेशान दीपदानविधिं प्रभो ॥
येन कृत्वा नरो भाग्यं प्राप्नोति ब्रूहि शंकर ॥
सुदिने सुस्थले रम्ये स्थण्डिले चतुरस्रकम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

कृत्वा तु गोघृतेनैव त्रयोदशसुसंख्यकम् ॥
स्वर्णतारशुल्बमार्तिमयान्प्रज्वाल्य दीपकान् ॥
षड्त्याकारेण संस्थाप्य रक्ताकाराश्च वर्तिकाः ॥
आवाहयेदाद्यदीपे प्रथमाध्यायदेवताम् ॥
पूजयेद् विधिना देवीमुपचारैस्तु षोडशैः ॥
श्लोकैश्च नवभिर्दत्वा पुष्पाणि च ततो हरेत् ॥
आद्याध्याय प्रतिश्लोकमेकैकं पुष्पमर्चयेत् ॥
धूपं दीपं च नैवेद्यं पायसं मुखवाससम् ॥
सदक्षिणाफलं चैवं नीराजनमथार्पयेत् ॥
द्वितीये दीपमध्याह्ने द्वितीयाध्यायदेवताम् ॥
क्रमात्त्रयोदशान्तं हि महापूजां ततश्चरेत् ॥
पूर्वाह्णे सौम्यकर्मन्तु क्रुरं स्यादपराह्णिके ॥
कटुतैलेन क्रूरादौ प्रेतभूमिस्थखर्परे ॥
उन्मत्ततैलकैर्वापि प्रेतकर्पटवर्त्तिभिः ॥
नीलैः कृष्णैरुग्रगन्धैः पुष्पैर्नैवेद्यपूजनैः ॥
स्वयं च तादृशो भूत्वा श्मशाने दक्षिणामुखः ॥
विश्वेश्वरी या संस्तुता या सांप्रतं या संस्तुता ॥
सर्वबाधा सर्वमंगलसृष्टिश्च शरणागत ॥
सर्वरूपेतिनवश्लोकान् ग्रहन्मणि ॥
निग्रहे सर्वबाधान्ते यवमुत्वे ततो वदेत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वैरिनाशनमित्यर्थं रोगे रोगविनाशनम् ॥
पुनः प्रपूज्य देवेशिं क्षमाप्य च विसर्जयेत् ॥
तच्छेषस्नेहैः प्रज्वाल्य स्थूलवर्तिसमन्वितः ॥
सेनाधिपो वर्ज्जेद् युद्धे वैरिश्चः प्रपलायते ॥

अथ सप्तशतीधारणं लिख्यते

तत्रायं क्रमः ॥

हरगौरीतन्त्रे ॥

यदा धने महाहानिरात्मनोग्लानिरेव च ॥
तदा धार्या सप्तशती रिपुघ्नी भूतिवर्द्धिनी ॥
दुःस्वप्नदर्शने घोरे माहामारीसमुत्थिते ॥
पुष्टिप्रदा सप्तशती पुंसामायुःक्षयेऽपि च ॥
महाभये त्वदुर्योगे दुर्भिक्षे मरकेऽपि च ॥
धारयेत्सप्तशतिकां त्रैलोक्यशुभगां प्रिये ॥
चण्डिकायजनं कुर्याद्यथोक्तविधिना ततः ॥
कुर्यात्तत्र शतावर्त्तं देव्या महात्म्यमुत्तमम् ॥
धारणे सप्तशत्यास्तु विशेषेण वरानने ॥
धारणाच्च भवेदायुर्धारणाच्च धनागमः ॥
वश्याः भवन्ति राजानः श्रियमाप्नोति उत्तमाम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
धनार्थि प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम् ॥
विद्यार्थी लभते विद्यां रोगी रोगात्प्रमुच्यते ॥
चतुर्वर्गफलावाप्तिकारणं रिपुनाशनम् ॥
श्रीचण्डीधारणसमं नास्ति यज्ञो वरानने ॥
चण्डीशतावर्तसमं नास्ति यज्ञं महेश्वरि ॥
धारणे सप्तसत्यास्तु शतावर्त्तं विधीयते ॥
चण्डीधारणे चण्डीपाठस्यावश्यकत्वमुक्तम् ॥
शुभे तिथौ शुभे लग्ने शुभे वारे विशेषतः ॥
कुर्याच्च लेखनारम्भं सप्तसत्याः सुशोभनम् ॥
आदौ तु कवचं लेख्यं पश्चात्सप्तशतीं लिखेत् ॥
चण्डिकाभक्तियुक्तेन ब्राह्मणेन लिखेन्मुदा ॥
सदाचारवता सम्यक् शुद्धाशुद्धविचारणा ॥
भूर्जपत्रे सप्तशतीं लिखेद्धेमशालाकया ॥
गोरोचनं सकर्पूरं श्रीखण्डं कुंकुमानि च ॥
आरक्तमदसिन्दूरं कस्तुरीसमधूनि च ॥
एकीकृत्य लिखेन्मन्त्री एकभक्तो हि सुस्थिरः ॥
चण्डिकां हृदये ध्यायेत्पूर्णं कुर्यात्शुभे दिने ॥
शुभेऽहनि ततः कुर्याद्यज्ञमण्डपमुत्तमम् ॥
चतुर्दिक्षु चतुर्द्वारं तोरणेन विभूषितम् ॥
शोभाढ्यं पुष्पमालाभिः कुर्यात्तत्र विशेषतः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ब्राह्मणान्वरयेत्तत्र शतावर्त्ते विशेषतः ॥
विधिमन्त्रं प्रवक्ष्यामि शृणुष्व वरवर्णिनी ॥
निमन्त्रयेत् तु पूर्वेद्यु र्विप्रान्विद्यासमन्वितान् ॥
नित्यादि शतावर्तमित्युपलक्षणं यथा शक्ति ॥
वा कारयेदिति ॥

× × ×

धारणं सप्तशत्यास्तु वक्ष्ये शास्त्रं समंविधिम् ॥
सिद्धे क्षेत्रे देवगृहे समुद्रस्य च सन्निधौ ॥
कुबेराशामुखो भूत्वा द्विहस्तमितस्थण्डिले ॥
षट्कोणान्तर्गतं पद्ममष्टपत्रं सुवर्त्तुलम् ॥
तद्बहिः षोडशदलं द्वात्रिंशस्तद्बहिर्लिखेत् ॥
षट्कोणं पीतवर्णेन पत्रपीतेन पूरयेत् ॥
वैपरीत्यं बहिर्यन्त्रं पञ्चवर्णैः परे लिखेत् ॥
चतुर्वर्णैश्चतुर्द्वारं तत्र पूजां समारभेत् ॥
गणेशं पूजयेद्दीशे पूर्वेचापि तथा ग्रहान् ॥
तद्दक्षिणे दिगीशांश्च ब्रह्माणं कर्णिकेऽर्चयेत् ॥
ब्रह्मादिपूजयेन्पत्रे अथ सप्तशतीञ्जपेत् ॥
दृष्ट्वा तन्त्रान्यनेकाण्यथ च बुधगणैः श्रीमहेशप्रणीतान्युच्चैः संक्षिप्य बुद्ध्या व्यरचि ननु मया चण्डिकाभक्ति भाजा ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ग्रन्थः प्रोद्यत्प्रमाणः प्रचुरतरलसद्युक्तिमुक्ताविताने
भद्राभद्रं च बुद्ध्वा दृढभमतिसुधिः शोधनीयो भवद्भिः ॥



इति नवमीसिंहकृतायां चण्डिभक्तिविनोदिन्यां तृतीय-
पटलः समाप्तः ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥
यदि शुद्धमशुद्धं वा शोधनीयं महद्बुधैः ॥
शुभमस्तु सर्वदा ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

महामात्य (चौतारा)

नवमीसिंह भण्डेल

राजभण्डारीका

अरू कृतिहरू

१. तन्त्रचिन्तामणि

२. कुलमुक्तिकल्लोलिणी

३. पुष्प रत्नाकर (जीवनी सहित प्रेसमा)

४. चण्डभक्तिविनोदिनी (तपाईको हातमा)

५. नेपाल भाषाका गीतहरू

मुद्रक : संकटा प्रेस, ख १–८३ टेवहाल, काठमाडौं–३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal